
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

प्रयोगानागमात्सिद्धान्प्रत्यक्षादनुमानतः सर्वे लोकहितार्थाय वक्ष्याम्यनतिवि
स्तरात् ९० अध्यायानुक्रमणिका

शा० ध० ९ श्रीरामाय नमः श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीयं स्मरद्याश्रवतां पुरारिर्यदंगतेजः प्रसरे भवानी विराजते निर्मलचंद्रि
कायां महौषधी वज्ज्वलिता हिमाद्रौ १ प्रसिद्धयोगा मुनिभिः प्रयुक्ताश्चिकित्सकैर्ये बहुशोनुभूताः विधीयते शार्ङ्गधरेण
तेषां सुसंग्रहः सज्जनरंजनाय २ हेत्वादिरूपाकृतिसाध्यजातिभेदैः समीक्ष्यातुरसर्वरोगान् चिकित्सितं कर्म यथेह रम्यं
कुर्वीत वैद्यो विधिवत्सुयोगैः ३ दिव्यौषधीनां बहवः प्रभेदा वृंदारकाणामिव विस्फुरंति ज्ञात्वेति संदेहमपास्य धीरैः
संभावनीया विविधप्रभावाः ४ स्वाभाविकागंतुककायिकांतरा रोगा भवेयुः किल कर्मदोषजाः तच्छेदनार्थं दुरितापहा
हारिणः श्रेयोमयान्योगवरान्नियोजयेत् ५ अत्र पंचमपरिभाषा स्यात् भैषज्याख्यानकं तथा नाडीपरीक्षादिविधिस्ततो
दीपनपाचनं ततः कलादिकाख्यानमाहारादिगतिस्तथा रोगाणां गणना चैव पूर्वखंडोयमीरितः ७ स्वरसः क्वाथफांटौ
च हिमः कल्कश्च चूर्णकं तथैव गुटिकालेहौ स्नेहः संधानमेव च ८ धातुशुद्धिरसाश्चैव खंडोयं मध्यमः स्मृतः स्नेहपा
नं स्वेदविधिर्वमनं च विरेचनं १० ततस्तु स्नेहबस्तिः स्यात्ततश्चापि निरूहणं ततश्चाप्युत्तरो बस्तिस्ततो नस्यविधिर्मतः ११

शाम
२

धूमपानविधिश्चैव गंडूषादिविधिस्तथा लेपादिनांविधिः ख्यातस्तथाशोणितविश्रुतिः १२ नेत्रकर्मप्रकारश्चखंडः स्यादुत्तरस्त्वयं द्वात्रिंशत्संमिताध्यायैर्युक्तेयंसंहितास्मृता १३ षड्विंशतिशतान्यत्रश्लोकानांगणितानिच अथप
रिभाषा नमानेनविनायुक्तिर्द्रव्याणांजायतेक्वचित् १४ अतः प्रयोगकार्यार्थंमानमत्रोच्यतेमया त्रसरेणुर्बुधैःप्रो
क्तस्त्रिंशतापरमाणुभिः १५ त्रसरेणुस्तुपर्यायनाम्नावंशीनिगद्यते जलांतरगतैः सूर्यकरैर्वंशीविलोक्यते १६ षड्वं
शीभिर्मरीचिःस्यात्ताभिः षड्भिश्चराजिका तिसृभिराजिकाभिश्चसर्षपः प्रोच्यतेबुधैः १७ यवोऽष्टसर्षपैःप्रोक्तो
गुंजास्यात्तच्चतुष्टयं षड्भिस्तुरक्तिकाभिः स्यान्माषकोहेमधान्यकौ १८ माषैश्चतुर्भिः शाणःस्याद्धरणस्तुनिगद्य
ते टंकः सएवकथितस्तद्वयंकोलउच्यते १९ क्षुद्रकोवटकश्चैवद्रंक्षणः सनिगद्यते कोलद्वयंचकर्षःस्या
त्सप्रोक्तः पाणिमाणिका २० अक्षःपिचुःपाणितलंकिंचित्पाणिश्चतिंदुकं बिडालपदकंचैवतथाषो
डशिकामता २१ करमध्योहंसपदंसुवर्णंकवलग्रहः उदंवरंचपर्यायैः कर्षएवनिगद्यते २२ स्यात्कर्षाभ्या
न

मद्धेपलं स्युक्तिरष्टमिका तथा शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका २३ प्रकुंचः षोडशी विल्वं पलमेवात्र
कीर्त्यते पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते २४ प्रसृतिभ्यामंजलिः स्यात्कुडवोर्द्धशरावकः ॥ अष्टमानं
च सं ज्ञेयः कुडवाभ्यां च [illegible] मानिका : २५ शरावोष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः शरावाभ्यां भवेत्प्रस्था
श्चतुः प्रस्थैस्तथाढकं २६ भाजनं कंसपात्रं च चतुःषष्टिपलश्च सः चतुर्भिराढकैर्द्रोणः कलशो नल्वणो
र्मणः २७ उन्मानं च घटो राशिर्द्रोणपर्यायसंज्ञितः द्रोणाभ्यां शूर्पकुंभौ च चतुःषष्टिशरावकः २८ शूर्पाभ्यां
भ्यां च भवेद्द्रोणी वाही गोणी च सा स्मृता द्रोणी चतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः २९ चतुःसहस्रप
लिका षण्णवत्यधिका च सा पलानां द्विसहस्रं च भार एकः प्रकीर्तितः ३० तुला पलशतं ज्ञेया सर्वत्रैवैष नि
श्चयः माषटंकाक्षविल्वानि कुडवं प्रस्थमाढकं ३१ राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः गुंजादि
मानमारभ्य यावत्स्यात्कुडवस्थितिः ३२ द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतं प्रस्थादिमानमारभ्य द्विगु

णं न द्रवार्द्रयो: मानं तथा तुलायास्तु द्विगुणं न क्वचित्स्मृतं मृद्वृक्षवेणुलौहादेर्भांडं यच्चतुरंगुलं विस्तीर्णं च तथो-
च्चं च तन्मानं कुडवं वदेत् यदौषधं तु प्रथमं यस्य योगस्य कथ्यते तन्नाम्नैव स योगो हि कथ्यतेऽत्र विनिश्चय:
इति मागधपरिभाषा स्थिपति नास्ति मात्राया: कालमग्निं च वयो बलं प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्प-
येत् यतो मंदानलो ह्रस्वा हीनसत्वा नरा: कलौ अतस्तु मात्रा तद्योग्या प्रोच्यते सुजनसंमता यवो द्वादशभिर्गौरस-
र्षपै: प्रोच्यते बुधै: यवद्वयेन गुंजा स्यात्त्रिगुंजो वल्ल उच्यते माषो गुंजाभिरष्टाभि: सप्तभिर्वा क्वचिद्भवेत् स्याच्चतुर्मा-
षकै: शाण: स निष्क टंक एव च गद्याणो माषकै: षड्भि: कर्ष: स्याद्दशमाषक: चतु: कर्षै: पलं प्रोक्तं दशशाण-
मितं बुधै: चतु:पलैश्च कुडवं प्रस्थाद्या: पूर्ववन्मता: कालिंगं मागधं चेति द्विविधं मानमुच्यते कालिंगान्मागधं श्रेष्ठं
मानं मानविदो विदु: इति कालिंगपरिभाषा नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु विना विडंगकृष्णाभ्यां गुड-
गंधप्रसारिणी २
धान्याज्यमाक्षिकै: गुडूची कुटजो वासा कूष्मांडं च शतावरी अश्वगंधा सहचरौ शतपुष्पा प्रसारिणी प्रयोक्तव्या

पीयावासा गंधप्रसारिणी

पीयावासा २

::::सदैवार्द्रो द्विगुणान्नैव कारयेत् [illegible] शुष्कं नवीनं द्रव्यं च योज्यं सकलकर्मसु ॥ आर्द्रं च द्विगु-
णं विंद्यादेष सर्वत्र निश्चयः ॥ कालेनानुक्ते प्रभातं स्यादंगेनानुक्ते जटा भवेत् भागेनानुक्ते च साम्यं स्यात्पात्रेनुक्ते च प्र-
स्थं ॥ एकमप्यौषधं योगे यस्मिन्यत्पुनरुच्यते मानतो द्विगुणं प्रोक्तं तद्द्रव्यं तत्वदर्शिभिः ॥ चूर्णस्नेहासवालेहाः
प्रायशश्चंदनान्विताः कषायलेपयोः प्रायो युज्यते रक्तचंदनं गुणहीनं भवेदूर्ध्वं तद्रूपमौषधं मासद्वया-
त्परतश्चूर्णं हीनवीर्यत्वमाप्नुयात् हीनत्वं गुटिकालेहौ लभेते वत्सरात्परं हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकात्त-
था ॥ ओषध्यौ लघुपाकाः स्युर्निर्वीर्या वत्सरात्परं पुराणाः स्युर्गुणैर्युक्ता आसवाद्यास्तु ये रसाः ॥ व्याधेरयुक्तं यद्द्र-
व्यं गणोक्तमपि तत्त्यजेत् ॥ अनुक्तमपि युक्तं हि योजयेत्तत्र तद्बुधैः ॥ इति युक्तायुक्तविचारः ॥ आग्नेया विंध्यशैला-
द्याः सौम्यो हिमगिरिर्मतः ॥ अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः ॥ अन्येष्वपि प्ररोहंति वनेषूपवनेषु च गृह्णी- राम
यान्नानि सुमनाः शुचिः प्रातः सुवासरे ॥ आदित्यसन्मुखो मौनी नमस्कृत्य शिवं हृदि साधारणधरायां गृह्णीया ३

द्रुमाश्रितं वल्मीककुत्सितानूपश्मशानोषरमार्गजाः जंतुवन्हिहिमव्याप्तानौषध्यः कार्यसाधिकाः सर्वलक्षणसंप
न्नाभूमिः साधारणास्मृता इथ्याणिपत्रयत्रैवतद्गुणनिविशेषतः शरद्यखिलकार्यार्थं ग्राह्यं सरसमौषधं विरेकव
मनार्थं च वसंतांते समाहरेत् अतिस्थूलजटायास्तु तासां ग्राह्यास्त्वचो ध्रुवं गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि
बुद्धिमान् न्यग्रोधादेस्त्वचो ग्राह्याः सारः स्याद्बीजकादितः तालीसादेश्च पत्राणि फलं स्यात्त्रिफलादितः इतिश्रौ
षधहरणप्रकारः इतिश्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां चि[illegible]कित्साने परिभाषाध्यायः १ भैषज्य
मभ्यवहरेत्प्रभाते प्रायशो बुधैः कषायांश्च विशेषेण तत्र भेदस्तु दर्शितः ज्ञेयः पंचविधः कालो भैषज्यग्रहणे न
णां किं [illegible] चेत्सूर्योदये जाते तथा दिवसभोजने सायंतने भोजने च मुहुश्चापि तथा निशि प्रा
यः पित्तकफोद्रेके विरेकवमनार्थयोः लेखनार्थं च भैषज्यं प्रभाते सान्नमाहरेत् एवं स्यात्प्रथमः कालो भैषज्यग्र
हणेन्नृणां इतिप्रथमः कालः भैषज्यं विगुणपाने भोजनाग्ने प्रशस्यते अरुचौ चित्रभोज्यैश्च मिश्रं रुचिरमा

ए०.प० हरेत् समानवाते विगुणेऽग्निमांद्ये चाग्निदीपनं दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् व्यानकोपे च भैषज्यं भो
४ जनांते समाहरेत् हिक्काक्षेपककंपेषु पूर्वमंते च भोजनात् एवं द्वितीयः कालश्च प्रोक्तो भैषज्यकर्मणि इति द्वि
तीयः कालः उदाने कुपिते वाते स्वरभंगादिकारिणि ग्रासग्रासांतरे देयं भैषज्यं सांध्यभोजने प्राणे प्रदुष्टे सां
ध्यस्य भुक्तस्यांते च दीयते औषधं प्रायशो धीरैः कालोयं स्यात् तृतीयकः इति तृतीयः कालः मुहुर्मुहुश्च तृ
ड्छर्दिहिक्काश्वासगरेषु च सान्नं च भेषजं दद्यादिति कालश्चतुर्थकः इति चतुर्थः कालः ऊर्द्ध्वजत्रुविकारेषु ले
खने बृंहणे तथा पाचने शमने देयमन्नं भेषजं निशि इत्येवं पंचमः कालः प्रोक्तो भैषज्यहेतवे इति पंचमः कालः
द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च संबंधेन क्रमादेताः पंचवस्थाः प्रकीर्तिताः मधुरोम्लपटुश्चैव
कटुतिक्तकषायकः इत्येते षट् रसाख्याता नानाद्रव्यसमाश्रिताः धरांबुक्ष्मानलजलज्वलनाकाशमारुतैः वा राम
ग्वग्निक्ष्मानिलैर्भूतद्वयै रसभवः क्रमात् इति रसाः गुरुस्निग्धश्च तीक्ष्णश्च रूक्षो लघुरिति क्रमात् धरांबुव ४

न्हिपवनमोम्नीष्णा॰ यो गुणाः स्मृताः मध्ये चान्तर्भवंत्यन्येगुणेषु गुणाः संचयाः इति गुणाः वीर्यं मुख्यं तथा शी
तं प्रायशो द्रव्यसंश्रयं यत्तवैभगिनिषोमी यं दृश्यते भुवनत्रयं अत्रैव वीतभेविष्यंति वीर्याण्यन्यानियान्यपि इति
वीर्यं मिष्टः पटुश्च मधुरमम्लोम्लं पच्यते रसः कषायकटुतिक्तानां पाकः स्यात्प्रायशः कटुः मधुराज्जायते श्ले
ष्मापित्तमम्लाच्च जायते कटुकाज्जायते वायुः कर्माण्येतानि पाकतः इति विपाकः प्रभावस्तु पथाधात्रीला
कुचस्य रसादिभिः समापि कुरुते दोषत्रितयस्य विनाशनं क्वचित्तु केवलं द्रव्यं कर्मकुर्यात्प्रभावतः ज्वरं हंति
शिरोवद्धा सहदेवी जटायथा इति प्रभावः क्वचिद्रसो गुणो वीर्यं विपाकः शक्तिरेव च कर्मस्वं स्वं प्रकुर्वै
ति द्रव्यमाश्रित्य ये स्थिताः इति द्रव्यरसगुणवीर्यविपाकप्रभावः चयकोपसमा यस्मिन्दोषाणां संभवंति हि
ऋतुषट्कं तदाख्यातं रवेराशिषु संक्रमात् ग्रीष्मो मेषवृषौ प्रोक्तो प्रावृट् मिथुनकर्कयोः सिंहकन्ये स्मृता व
र्षा तुलावृश्चिकयोः शरत् धनुर्ग्राहौ च हेमंतो वसंतः कुंभमीनयोः ग्रीष्मे संचीयते वायुः प्रावृट्काले प्रकुप्य

शा०ध०
५

ति वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति हेमंते चीयते श्लेष्मा वसंते च प्रकुप्यति प्रायेण प्रशमं याति स्वयमे
व समीरणः शरत्काले वसंते च पित्तं प्रावृट्ऋतौ कफः कार्तिकस्य दिनान्यष्टौ अष्टावाग्रहणस्य च यमदंष्ट्रेति
विख्याताऽल्पाहारी भवेत्ततः चयकोपसमा दोषा विहाराहारसेवनैः समानैर्यांति कालेपि विपरीतैर्वि
पर्ययैः लघुरूक्षमिताहारादतिशीतात् श्रमातपात् प्रदोषे कामशोकाभ्यां भीचिंतारात्रिजागरैः अभिघा
तादपांगाहाज्जीर्णेन्ने धातुसंक्षयात् वायुः प्रकोपं यात्येभिः प्रसन्नैश्च शाम्यति विदाहिकटुकाम्लोष्णभोज्यै
रत्युष्णसेवनात् मंदाग्नौ च प्रभाते च भुक्तमात्रे तथाश्रमात् श्लेष्मा प्रकोपं यात्येभिः प्रसन्नैश्च शाम्यति इति श्री
दामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां स्वस्थाने भैषज्यकालोक्तिद्रव्यरसगुणवीर्यविपाकप्रभावोक्तिऋ
तुषट्काख्यानोऽध्यायः २ आरोग्ये सर्वरोगेषु नाडिका मूत्रयोस्तथा परीक्षां कारयेद्वैद्यः पश्चाद्रोगं चिकित्सयेत् राम
करस्यांगुष्ठमूले या धमनी जीवसाक्षिणी तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पंडितैः वाताद्वक्रगतिर्नाडी चप ५
मध्याह्ने क्षुत्तमारोघाज्जीर्यत्यन्ने हि रात्रके पित्तं प्रकोपं यात्येभिः प्रसन्नैश्च शा
म्यति मधुरस्निग्धशीतादिभोज्यैर्हिंव सनिद्रया ८

लापित्तवाहिनी स्थिराश्लेष्मवहाप्रोक्तामिश्रासाद्वंद्वजाविदुः वाताधिक्येवहेत्वग्नेमध्येवहतिंततः ऽग्नंतश्लेष्म
वती नाडीसंनिपातेत्रिलक्षण नाडीश्चत्तेमहत्क्रोपेजलौकासर्पयोगीतिं कुलिंगकाकमंडूकगतिंतस्यकोपतः हंसपा
रावर्ततिंचैतेश्लेष्मप्रकोपतः लावतित्तिरवगमनंसंनिपाततः कदाचिन्मंदगमनाकदाचिद्वेगवाहिनी द्विदोषतोतेयाहं
तिस्थानविच्युतास्थित्वास्थित्वाचलतियासासंमृताप्राणनाशिनी ऽत्रतिक्षीणाचशीताचजीवितंहंत्यसंशयं ज्वरकोपे
नच्चमनीसोष्णावेगवतीभवेत् कामक्रोधाद्वेगवहाक्षीणाचिंताभयप्लुता मंदाग्नेःक्षीणधातोश्चनाडीमंदतराभवेत्
ऽसृक्पूर्णाभवेत्कोष्णागुर्वीसामागरीयसी लघ्वीवहतिदीप्ताग्नेस्तथावेगवतीमता सुखिनस्यस्थिरातेयातथाब
लवीतीसृता चपलाक्षुधितस्यापितृप्तस्यवहतिस्थिरा सद्यःस्नातस्यभुक्तस्यक्षुत्तस्मात्तुपणीत्विनः व्यायामात्रां
तरेहस्पसम्यक्नाडीनबुध्यते इतिनाडीपरिक्षा विकाशिचेत्तैलमध्यास्तुमत्वेसाध्यः सरोगोनविकाशितंचेत् सक
ष्टसाध्यस्तलरोगोऽसाध्योनागार्जुनेनैवकृतापरीक्षा इतिमूत्रपरिक्षा स्वप्नेषुमुंजनमनांश्वरक्तकस्मांवराऽतान्

ग्र.५० अंगोश्च विकृतांकस्मान् सपाशान्सायुधानपि बध्नतो निघ्नतश्चापि दक्षिणां दिशमाश्रितान् महिषोष्ट्रखरारूढा

६ न् स्त्रीपुंसो यस्तु पश्यति स स्वस्थो लभते रोगं रोगी वा स एव पंचतां अधो यो निपतेदुच्चाज्जले ऽग्नौ वा विलीयते श्वापदैर्है

न्यते यो पि मत्स्याद्यैर्गिलितो भवेत् यस्य नेत्रे विलीयेते दीपो निर्वाणतां व्रजेत् तैलं सुरां पिबेद्वापि लोहं वा लभते तिति

ल्नान् पक्वान्नं लभते श्रान्ति विशेत्कूपं रसातलं स स्वस्थो लभते रोगं रोगी पा स एव पंचतां दुःस्वप्नान्येवमादीनि दृष्ट्वा

न यान्न कस्यचित् स्नानं कुर्याद्द्विजस्येह घाद्देमतिलान्नपः पठेत्स्तोत्राणि देवानां रात्रौ देवालये वसेत् कृते वं त्रिदिनान्मत्यो

दुःस्वप्नात्परिमुच्यते स्वप्ने भूयः सुरान् भूपान् जीवतः सुहृदो द्विजान् गोसमिद्धाग्नितीर्थानि पश्येत्स सुखमाप्नुया

त् तीर्त्वा कलुषनीराणि जित्वा शत्रुगणानपि अत्युच्चशैलगोसौधकरिवाहान् सुखी भवेत् श्वेतपुष्पाणि वा

[illegible]ंसि मांसमत्स्यफलान्यपि प्राप्यातुरः सुखी भूयात्स्वस्थो धनमवाप्नुयात् अगम्यागमनं लेपो विष्टा

याः रुदितं मृतिः आममांसाशनं स्वप्ने धनारोग्याप्तये विदुः जलौकाभ्रमरीसर्पा मक्षिका वापि यं दशेत् रोगी स भूया ६

सद्यः स्नातस्य भक्तस्य तथा ले हो वमाहिनः सु त्पार्तस्य सुप्तस्य नाशीतमप्र.न बु ध्यते

राम:

११

हारोग्यः स्वस्थो धनमवाप्नुयात् इति स्वप्नलक्षणानि दूताः सुजातयो व्यंगाः पटवो निर्मलांबराः सुखिनश्च वृषारूढा
शुभ्रपुष्पफलैर्युताः सुजातयः सुचेष्टाश्च सजीवदिग्दिशि संगताः भिषजं समुपेयाता रोगिणः सुखहेतवः यस्यां
प्राणमरुद्याति सा नाडी जीवसंज्ञिता इति दूतलक्षणं चिकित्सां रोगिणः कर्तुं गच्छतो भिषजः शुभं यात्रेयं सौम्यशकुनं
प्रोक्तं रोगिनां तं शोभनं वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते नश्शुभं सौम्यशकुनं प्रदीप्तं चतुरावहं इति शकुनं
निजप्रकृतिवर्णाभ्यां युक्तः सत्वेन संयुतः चिकित्स्यो भिषजा रोगी वैद्यभक्तो जितेंद्रियः इति रोगीलक्षणम् इति
श्रीदामोदरसूनुना शार्ङ्गधरविरचितायां संहितायां सूत्रस्थाने नाडीपरीक्षा स्वप्नलक्षण दूतशकुनरोगीलक्षणानि [illegible]
पचेत्त्वामं वह्निकृच्च दीपनं तद्यथा मिसिः पचेन्नामं न वह्निं च कुर्याद्यत्तद्धि पाचनं नागकेशरवद्विद्याच्चित्रो दीपनपाच
नः शोधमति न द्वेषे समान्दोषान्नत्योज्झरन् समीकरोति यल्लेयं शमनं तद्यथामृता कृत्वा पाकं मलानां यद्भित्वा बंध
मधो नयेत् तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी पक्तव्यं यदपक्वैव श्लिष्टं कोष्ठे मलादिकम् नयत्यधः स्रंसनं तद्य

शा०धं०

७

प्यास्यात्कृतमालकः मलादिकमबद्धंयद्बद्धंवापिंडितंमलैः भित्वाधःपातयतितद्भेदनंकटुकीयथा विपक्वंयदपक्वंवा

मलादिद्रवतांनयेत् रेचयत्यपितज्ज्ञेयंरेचनंत्रिवृतायथा ॥ अपक्वपित्तश्लेष्माणौबलादूर्ध्वंनयेतुयत् वमनंतद्धिविज्ञेयं

मदनस्यफलंयथा स्थानाद्बहिर्नयेदूर्ध्वमधोवामलसंचयं देहसंशोधनंतत्स्याद्देवदालीफलंयथा श्लिष्टान्कफा

दिकान्दोषानुन्मूलयतियद्बलात् छेदनंतद्यथाक्षारामरिचानिशिलाजतु धातून्मलान्वादेहस्यविशोष्योल्ले

खयेतुयत् लेखनंतद्यथाक्षौद्रंनीरमुष्णंवचायवा दीपनंपाचनंयत्स्यादुष्णत्वाद्द्रवशोषकं ग्राहितच्चयथाशुं

ठीजीरकंगजपिप्पली रौक्ष्याच्छैत्यात्कषायत्वाल्लघुपाकाच्चयद्भवेत् वातकृत्स्तंभनंयत्स्याद्यथावत्सकटिंडकौ रसा

यनंचतज्ज्ञेयंयज्जराव्याधिनाशनं यथामृतारुदंतीचगुग्गुलुश्चहरीतकी यस्माद्व्यवायेत्स्त्रीषुहर्षोवाजीकरंतुतत्

यथानागबलाद्याःस्युर्बीजंचकपिकच्छुजम् यस्माच्छुक्रस्यवृद्धिःस्याच्छुक्रलंचतदुच्यते यथाश्वगंधामुशलीश राम

र्कराचशतावरी दुग्धंमाषाश्चभल्लातफलमज्जामलानिच प्रवर्तकानिकथ्यंतेजनकानिचरेतसः प्रवर्तनंस्त्री १

भटकटया जायफल इंद्रजव

ष्टकस्य रेचनं वृहतीफलं जातीफलं स्तंभकं स्यात्कालिंगं क्षयकारि च देहस्य सूक्ष्मच्छिद्रेषु विशेद्यत्सूक्ष्ममुच्यते त
यथा सैंधवक्षौद्रं निंबतैलं रुवृद्भवं पूर्वं व्याप्याखिलं कायं ततः पाकं च गच्छति व्यवायि तद्यथा भंगा फेनं चाहेः स
मुद्भवं संधिबंधान् तु शिथिलान् यत्करोति विकाशि तत् विश्लेष्यौजस्तु धातुभ्यो यथा क्रमुककोद्रवौ बुद्धिं लुंपति यद्द्रव्यं
मदकारि तदुच्यते तमोगुणप्रधानं च यथा मद्यं सुरादिकं व्यवायि च विकाशि स्यात्सूक्ष्मं छेदि मदावहं आग्नेयं जीवि
तहरं योगवाहि स्मृतं विषं निजवीर्येण यद्द्रव्यं स्रोतोभ्यो दोषसंचयं निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा पैच्छि
ल्याद्गौरवाद्द्रव्यं रुद्ध्वा रसवहाः शिराः धत्ते यद्गौरवं तत्स्यादभिष्यंदि यथा दधि इति श्रीदामोदरसूनुना शार्ङ्गधरेण
विरचितायां संहितायां दीपनपाचनादिगुणऽध्यायः ४ कलाः सप्ताशयाः सप्त धातवः सप्त तन्मलाः सप्तोपधा
तवः सप्त प्रकीर्तिताः त्रयो दोषा नव शतं तथा चतुर्विंशतिराख्याता धमन्यो रसवाहिकाः मांसपेश्यः समाख्याता
नृणां पंचशतं बुधैः स्त्रीणां च विंशत्यधिकाः कंडराश्चैव षोडश नृदेहे दश रंध्राणि नारीदेहे त्रयोदश एतत्समास

शा०पू०
८

तःप्रोक्तंविस्तरेणांबुनोच्यते मांसासृङ्मेदसांतिस्रोय कृत्प्लीह्नोश्चतुर्थिका पंचमीचतथान्त्राणांषष्ठीचाग्निधरा
मता रेतोधरासप्तमीतिसप्तकलाःस्मृताः श्लेष्माशयःस्यादुरसितस्मादामाशयस्त्वधः ऊर्ध्वमग्न्याशयोनाभे
र्वामभागेव्यवस्थितः तस्योपरितिलंज्ञेयंतदधः पवनाशयः मलाशयस्त्वधस्तस्यवस्तिर्मूत्राशयःस्मृतः जीवर
क्ताशयमुरोज्ञेयाःसप्ताशयास्त्वमी पुरुषेभ्योधिकास्त्वन्येनारीणामाशयास्त्रयः धरागर्भाशयःप्रोक्तःस्तनौ
स्तन्याशयौमतौ रसासृङ्मांसमेदोस्थिमज्जाशुक्राणिधातवः जायंतेऽन्योन्यतःसर्वेपाचिताःपित्ततेजसा ।
जिह्वानेत्रकपोलानांजलंपित्तंचरंजकं कर्णविट्रसनादंतकक्षामेढ्रादिजंमलं नखनेत्रमलंवक्त्रेस्निग्धत्वंपिडि
कास्तथा जायंतेसप्तधातूनांमलान्येवमनुक्रमात स्तन्यंरजश्चनारीणांकालेभवतिगच्छति शुद्धमांसभवः
स्नेहोवसासाकीर्तितेबुधैः स्वेदोदंतास्तथाकेशास्तथैवौजश्चसप्तमं ओजःसर्वशरीरस्थंशीतंस्निग्धंस्थि
रंसितं सोमात्मकंशरीरस्यबलपुष्टिकरंमतं इतिधातुभवाज्ञेयाएतेसप्तोपधातवः तेषां [illegible]

राम
८

वभासिनीप्रथमासिध्मस्थानंचसामता द्वितीयालोहिताज्ञेयातिलकालकजन्मभू श्वेतातृतीयासंख्यातास्थानं
चर्मदलस्यसा ताम्राचतुर्थीविज्ञेयाकिलासश्वित्रजन्मभूः पंचमीवेदिनीख्यातासर्वकुष्ठोद्भवस्ततः विख्यातालो
हिताषष्ठीग्रंथिगंडापचीस्थितिः स्थूलालकसप्तमीख्याताविद्रध्यादेः स्थितिश्चसा इतिसप्तत्वचःप्रोक्ताःस्थूला
व्रीहिद्विमात्रयावायुः पित्तंकफोदोषाधातुंवश्चमंलास्तथा तत्रापिपंचधाख्याताः प्रत्येकंदेहधारणात् पवनस्ते

पंग

षुबलवान्विभागकरणान्मता पित्तंपंगुकफःपंगुर्वोमलधातवः वायुनायत्रनीयंतेतत्रगच्छंतिमेघवत् रजोगुण
मयःसूक्ष्मःशीतोरूक्षोलघुश्चलः प्राणःपंचमेदात्मासर्वदेहेप्रवर्तते मलाशयेचरेत्कोष्ठवह्निस्थानेतथाहृदि
कंठेसर्वांगदेशेषुवायुःपंचप्रकारतः अपानःस्यात्समानश्चप्राणोदानस्तथैवच व्यानश्चेतिसमीरस्यनामान्यु
क्तानिसूरिभिः पित्तमुष्णंद्रवंपीतंनीलंसत्वगुणोत्तरं कटुतिक्तरसंज्ञेयंविदग्धंचाम्लतांव्रजेत् अग्न्याशयेभवेत्सो
लमग्निरूपंतिलोन्मितं त्वचिकांतिकरंज्ञेयंलेपाभ्यंगादिपाचनं दृश्यंयकृतियत्पित्तंतद्रसंशोणितांनयेत् यत्पित्तं

शा० ध०
६

नेत्रयुगलेरूपदर्शनकारितत् यत्पित्तं हृदये तिष्ठेत्मेधाप्रज्ञाकरं च तत् पाचकं भ्राजकं चैव रंजकं लोचकं तथा
साधकं चेति पंचैव पित्तनामान्यनुक्रमात् कफः स्निग्धो गुरुः श्वेतः शीतलः पिच्छलस्तथा तमोगुणाधिकः स्वा
दुर्विदग्धो लवणो भवेत् कफ आमाशये मूर्ध्नि कंठे हृदि च संधिषु तिष्ठन्करोति देहस्य स्थैर्यं सर्वांगपाटवं क्ले
दनः स्नेहनश्चैव रसनश्चावलंबनः श्लेष्मा कश्चेति नामानि कफस्योक्तान्यनुक्रमात् स्नायवो बंधनं प्रोक्ता
देहे मांसास्थिमेदसां आधारश्च तथा सारः कार्यैः स्पष्टीनिबुध्यानिदुः मर्माणि जीवधाराणि प्रायेण मुन
योजगुः संधिबंधनकारिण्यो दोषधातुवहाः शिराः धमन्यो रसवाहिन्यो धमंति पवनं तनौ मांसपेश्यो बला
यस्युर्वष्टंभाय देहिनां प्रसारणाकुंचनयो रंध्राणां केंद्रा मताः नासानयनकर्णानां द्वे द्वे रंध्रे प्रकीर्तिते
मेहनापानवक्त्राणामेकैकं रंध्रमुच्यते दशमं मस्तके प्रोक्तं रंध्राणीति नृणां विदुः स्त्रीणां त्रीण्यधिकानि
स्युः स्तनयोर्गर्भवर्त्मनः सूक्ष्मच्छिद्राणि चान्यानि मतानि त्वचि जन्मिनां तद्यामेकुकुसंज्ञीहाहसिणांगे

राम
६

17

हजाकी कुचनाट के सररे कर। कीसतुरीएकर। अहिफेनएकरती। ॥

यकृन्मतं उदानवायोराधारः फुफ्फुसं प्रोच्यते बुधैः रक्तवाहिशिरामूलं प्लीहाख्यातो महर्षिभिः यकृद्दक्षिणकपित्त
स्य स्थानं रक्तस्य संश्रयं जलवाहिशिरामूलं तस्मात्छादनकं तिलं वृक्कौ पुष्टिकरौ प्रोक्तौ जठरस्यस्य मेदसः वी
र्यवाहिशिराधारौ वृषणौ पौरुषावहौ गर्भाधानकरं लिंगं मयनं वीर्यमूत्रयोः हृदयं चेतनास्थानं मोजसश्चा।
श्रयं मतं शिराधमन्यो नाभिस्थाः सर्वे व्याप्य स्थितास्तनुं पुष्णंति चानिशं वायोः संयोगात्सर्वधातुभिः नाभिस्थः
प्राणपवनः स्पृष्ट्वा हृत्कमलांतरं कंठाद्बहिर्विनिर्याति पातुं विष्णुपदामृतं पीत्वा चांबरपीयूषं पुनरायाति
वेगतः प्रीणयन्देहमखिलं जीवयन्जठरानलं शरीरप्राणयोरेवं संयोगादायुरुच्यते कालेनतद्वियोगाच्च
पंचत्वं कथ्यते बुधैः नजंतुः कश्चिदमरः पृथिव्यां जायते क्वचित् अतो मृत्युरवार्यः स्यात्किंतु रोगान्नि
वारयेत् याप्यत्वं याति साध्यस्तु याप्यो गच्छत्यसाध्यतां जीवितं हंत्यसाध्यस्तु नरस्याप्रतिकारिणः अ
तो रक्षेत्तनुं रक्षेन्नरः कर्मविपाकवित् धर्मार्थकाममोक्षाणां शरीरं साधनं यतः रोगास्तस्यापहर्तारो।

18

ग्रा०ध० श्रेयसो जीवितस्य च ध्यातव्यस्तन्मलादोषानाशयंस्तस्मात्तनुं सभाः सुखाय विज्ञेयाः वलाभोपचयायच

९० इति कलादिकथनं जगद्योनेरनिच्छस्य चिदानंदैकरूपिणः पुंसोस्ति प्रकृतिर्नित्या प्रतिच्छायेव भास्वतः —
अचेतनापि चैतन्ययोगेन परमात्मनः अकरोद्विश्वमखिलमनित्यं नाटकाकृति प्रकृतिर्विश्वजननी पूर्वं
बुद्धिमजीजनत् — इच्छामयी महद्रूपामहंकारस्ततोभवत् त्रिविधः सोपि संजातो रजः सत्वतमोगुणैः तस्मा
त्सत्वरजोयुक्तादिंद्रियाणि दशाभवन् मनश्च जातं तान्याहुः श्रोत्रत्वक्नयनं तथा जिव्हाघ्राणं च वचोहस्त
पादोपस्थगुदानि च पंचबुद्धींद्रियाण्याहुः प्राक्तनानीतराणि च कर्मेंद्रियाणि पंचैव कथ्यंते सूक्ष्मबुद्धि
भिः तमः सत्वगुणोत्कृष्टादहंकारात्तथाभवत् तन्मात्रपंचकं तस्य नामान्युक्तानि सूरिभिः शब्दतन्मात्रकं
स्पर्शतन्मात्रं रूपमात्रकं रसतन्मात्रकं गंधतन्मात्रं चेति तद्विदः तन्मात्रपंचकात्तस्मात्संजातं भूतपंचकं व्यो राम
मानिलानलजलं क्षोणीरूपं च तन्मतं शब्दस्पर्शरूपं च रसगंधाश्चानुक्रमात् तन्मात्राणां विशेषास्युः स्प ९०

19.

लभावमुपागताः बुद्धींद्रियाणां पंचैव चक्षुरादाविषया मताः कर्मेंद्रियाणां विषया भाषादानविहारिताः आ
नंदोत्सर्गकौ चैव कथितास्तत्वदर्शिभिः प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा एतानि तस्य नामानि शिव
माश्रित्य यास्थिता महानहंकृतिः पंचतन्मात्राण्यष्टप्रकृत्यक. प्रकृतिविकृतिश्चैव सप्तैतानि बुधा जगुः द
शेंद्रियाणि चित्तं च महाभूतानि पंचधा विकाराः षोडशज्ञेया सर्वं व्याप्य जगत्स्थिताः एवं चतुर्विंशतिभिस्तत्वैर्नि
ष्पन्नं वपुर्गृहे जीवात्मा नियतो नित्यो वसति स्वात्मकृतवान् सदेही कथ्यते पापपुण्यदुःखसुखादिभिः व्याप्तो बद्ध
स्तु मनसा कृत्रिमैः कर्मवेष्टनैः कामक्रोधौ लोभमोहावहंकारश्च पंचमः देहेंद्रियाणि बुद्धिश्चैतस्यैवं घायदे
हिनः प्राप्नोति बंधमतता नाशात्मज्ञानाच्च मुच्यते तद्धः खयोगकष्टाद्विरोगं तस्य सुखावहं इति सृष्टिक्रमकथ
नं इतिश्री शार्ङ्गधरेण विरचितायां संहितायां शरीरकल्पादि सृष्टिक्रमकथनाध्यायः ५ मासा माषाश्च माहा
रः पर्वैश्चाग्निलेरितः माधुर्ये फेनभावं च षड्भूतोपि लभेतसः अथ पाचकपित्तेन विदग्धश्चाम्लतां भजेत

३ ॥त्रपक्वा

शा०ध० ११

ततः समानमरुत्तापक्वामाशंपनीयते ग्रहण्यां पाच्यते कोष्टे वन्हिना जायते कटुः रसो भवति संपक्वाँदामसं
चयः वन्हेर्वैलेमाधुर्येस्निग्धतां याति तद्रसः पुष्णाति धातून खिलान सम्यक् पक्वोमृतोपमः मंदवन्हिविद
ग्धश्च कटुश्चाम्लो भवेद्रसः विषभावं व्रजेद्वापि कुर्याद्वारोगसंकरं ॥ आहारस्य रसः सारः सारहीनो मलद्र
वः शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात् तत्किट्टं च मलं ज्ञेयं तिष्टेत्स पक्वाशये च तत् वलित्रितयमा
र्गेयास्य पानेन नोदितं प्रवाहनीसर्जनी चयनाहिकेति वलित्रयं रसः स हृदयं याति समानमरुतेरितः रंजि
तः पाचितस्तत्र पित्तेन याति रक्ततां रक्तं सर्वेशरीरस्य जीवस्याधार उत्तमः स्निग्धं गुरु चलं स्वादु विदग्धं पित्तव
द्भवेत् पाचिता: पित्ततापेन रसाद्या धातवः क्रमात् शुक्रत्वं याति मासेन तथा स्त्रीणां रजो भवेत् कामान्मिथु
नसंयोगे शुद्धशोणितशुक्रजः गर्भः संजायते नार्याः स जातो बाल उच्यते ॥ आधिक्ये रजसः कन्या पुत्रः शु
क्रेऽधिके भवेत् नपुंसकः समत्वेन यथेच्छा पारमेश्वरी बालस्य प्रथमे मासि देया भेषजरक्तिका ॥ अवलेही

राम ११

कृशैकैः वक्षीरक्षौद्रसिताद्यैः वर्द्धयेत्तावदेकैकं यावद्भवति वत्सरः माषैर्वे हित्तदूर्ध्वं स्याद्यावत्षोडशवत्स
राः ततः स्थिरा भवेत्तावद्यावद्वर्षाणि सप्ततिः ततो बालवत्कवमात्राह्रासनीया शनैः शनैः मात्रेयं कल्कच।
र्णानां कषायाणां च मुष्टिना ॥ अंजनं च तथा लेपः स्नानमभ्यंगकर्म च वमनं प्रतिमर्शश्च जन्मप्रभृति शस्यते।
कवलः पंचमाद्वर्षादष्टमान्नस्यकर्म च विरेकः षोडशाद्वर्षाद्विंशतेश्चैव मैथुनं बाल्यं वृद्धिः स्थविर्मेधात्वक्
दृष्टिः शुक्रं विक्रमौ बुद्धिः कर्मेन्द्रियं चैव जीवितं दशमे ह्रसेत् इत्याहारपाकगर्भोत्पत्तिकुमारादिपोषणानि॥ अ
ल्पकेशः कृशो रूक्षो वाचालश्चलमानसः। आकाशचारी स्वप्नेषु वातप्रकृतिको नरः। अकाले पलितैर्व्या
प्तो धीमान स्वेदी च रोषणः। स्वप्नेषु ज्योतिषां द्रष्टा पित्तप्रकृतिको नरः गंभीरबुद्धिः स्थूलांगः स्निग्धकेशो म
हाबलः स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः सातव्या मिश्रा चिन्हैश्च द्वित्रिदोषोल्बणा नराः तमः
कफात्स्यान्निद्रा स्यान्मूर्छा पित्ततमोभवा रजःपित्तानिलेभ्यो भ्रान्तिस्तंद्रा श्लेष्मतमोनिलैः ग्लानिरोजःक्षयाद्दुःखा

22

दन्तौष्ठौ च समाद्भवेत् यः समीरः प्रमुत्साह स्वरादस्यमुदीर्यते चैतन्यशिथिलत्वाच्च पीत्वैकं श्वासमुद्धरेत् विदी
र्णवदनः श्वासं जृंभां ताकथ्यते बुधैः उदानप्राणयोरूर्ध्वं योगान्मौलिकफलत्ववात् शब्दः संजायते नस्तः क्षुतं तत्क
थ्यते बुधैः उदानकोपादाहारस्य स्थितत्वाच्च यद्भवेत् पवनस्योर्ध्वगमनं तमुद्गारं प्रचक्षते इति प्रकृतिलक्षणानि इति श्री
दामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां शारीरे आहारगत्याकोष्ठगर्भोत्पत्तिकुमारपोषणोत्पत्तिप्रकृतिलक्षण
ख्यानाध्याय ६ रोगाणां गणना पूर्वं मुनिभिर्या प्रकीर्तिता मयात्र प्रोच्यते सैव तद्भेदा बहवो मताः पंचविंशतिरुद्दिष्टा
ज्वरास्तद्भेद उच्यते पृथक्दोषैस्त्रिधाद्वंद्वभेदेन त्रिविधः स्मृतः एकश्च सन्निपातेन तद्भेदा बहवः स्मृताः प्रायशः स
न्निपातेन पंचस्युर्विषमज्वराः तथागंतुज्वरोप्येकः त्रयोदशविधो मतः अभिचारग्रहावेशशापैरागंतुकस्त्रिधा
श्रमाच्छेदात्क्षताद्दाहाच्चतुर्धा वातजो ज्वरः कामाद्भीतेः शुचो रोषाद्विषाद्भेषजगंधतः अभिघातज्वराः षट्स्युरेवं राम
ज्वरविनिश्चयः पृथक्त्रिदोषैः सर्वैश्च शोकादामाद्भयादपि अतीसारः सप्तधास्याद्ग्रहणीपंचधा स्मृता पप ९२

कदोषैः सन्निपातात्तथा मेन च पंचमी ॥ प्रवाहिका चतुर्द्धा स्यात्पृथक् दोषैस्तथास्रतः ॥ अजीर्णं त्रिविधं प्रोक्तं वि
ष्टब्धं वायुना मतं ॥ पित्ताद्विदग्धं निर्दिष्टं कफेनामं तदुच्यते ॥ विषाजीर्णं रसादेके दोषैः स्यादलसस्त्रिधा ॥ विसूची
त्रिविधा प्रोक्ता दोषैः सा स्यात्पृथक्पृथक् ॥ दंडकालसकं चैवमेकैव स्याद्विलंबिका ॥ अर्शांसि षड्विधान्याहु
र्वातकपित्तकफास्रतः ॥ सन्निपाताच्च संसर्गात्तेषां भेदो द्विधा मतः ॥ सहजोत्तरजन्माभ्यां तथा शुष्कार्द्रभेदतः ॥ त्रिवि
धाश्चर्मकीलाः स्युर्वातात्पित्तकफादपि ॥ द्वाविंशच्च प्रकारेण कृमयः स्युर्द्विधोच्यते ॥ बाह्यास्तथाभ्यंतरास्तु
स्तेषु यूका वहिश्चराः ॥ लिख्याश्चान्येंऽतरचराः कफात्तेहृदयादयः ॥ अंत्रादाः शरावेष्टाश्च रवश्च महाकुहाः ॥ सुगं
धाश्च दर्भकुसुमास्तथा रक्ताच्च मातरः ॥ सौरसा लोमविध्वंसा रोमद्वीपा उदुंबराः ॥ केशादाश्च तथैवान्ये शकृज्जाता
मकेरुकाः ॥ लेलिहाश्च सशूलाश्च सौसुरादाः ककेरुकाः ॥ तथान्ये कफरक्ताभ्यां संजाताः स्नायुकाः स्मृताः ॥ व्रण
स्पकमयश्चान्ये विषमा वाह्यायोनयः ॥ पांडुरोगाश्च पंच स्युर्वातपित्तकफैस्त्रिधा ॥ त्रिदोषैर्मृत्तिकाभिश्च तथैव कामला

ग्र० ५०
१३

मलास्स्मृता स्यात्कुंभाकामलैका च तथैकं च हलीमकं रक्तपित्तं त्रिधा प्रोक्तं मऊर्ध्वगं कफसंगतं अधोगं मारुतात्सिपं
तद्द्वयेन हि मार्गगं कासाः पंचसमुद्दिष्टास्तेत्रयस्यात्त्रिभिर्मलैः उरःक्षताच्चतुर्थस्स्यात्क्षयाद्धातोश्च पंचमः क्षयाः
पंचैव विज्ञेयास्त्रिभिर्दोषैस्त्रयश्च ते चतुर्थः सन्निपातेन पंचमः स्यादुरःक्षतात् शोषाः स्युः षट्प्रकारेण स्त्रीप्र
संगाच्च शोकरणात् अध्वश्रमाच्च व्यायामाद्वार्द्धकात्त्पिनापत्ते श्वासाश्च पंच विज्ञेयाः क्षुद्रः स्यात्तमकस्तथा ऊ
र्ध्वश्वासो महाश्वासः छिन्नश्वासश्च पंचमः कथिताः पंच हिक्कास्तु तास्तु क्षुद्रान्नजा तथा गंभीरा यमला चै
व महती पंचमी स्मृताः चत्वारोऽग्निर्विकाराः स्युर्विषमो वातसंभवः तीक्ष्णः पित्तात्कफान्मंदो भस्मको वातपि
त्तयोः पंचैवारोचकाः ज्ञेया वातपित्तकफैस्त्रिधा सन्निपातान्मनस्तापाच्छर्द्दयः सप्तधा मताः त्रिभिर्दोषैः
पृथक्कृतिस्त्रः क्रिमिभिः सन्निपाततः घृणया च तथा स्त्रीणां गर्भोत्थानाच्च जायते स्वरभेदाः षडेव स्युर्वातपित्त
कफैस्त्रयः मेदसा सन्निपातेन क्षयात्षष्ठः प्रकीर्तितः मूर्छा चतुर्विधा ज्ञेया वातपित्तकफैः पृथक् चतुर्थी

राम
१३

25

सन्निपातेन तत्रैकश्चत्वारः स्मृताः निद्रातंद्रा च संन्यासो ग्लानिश्चैवैकशः स्मृत मदात्ययश्चतुर्द्धा स्याद्वाता
त्पित्तात्कफादपि त्रिदोषैरपि विज्ञेय एकः परमदस्तथा पानाजीर्णे तथैवैकं तथैकः पानविभ्रमः पानात्य
तस्तथा चैको दाहाः सप्त तथा मताः रक्तपित्तात्तथा रक्तात् धायाः पित्ततस्तथा धातुक्षयात् मर्मघातात् तृष्णाप
णोदरादपि उन्मादाः षट् समाख्याता वातात्त्रिभिर्दोषैस्त्रयश्चत्ते सन्निपाताद्विषाज्ज्ञेयः षष्ठोदुःखेन चेतसा भूतोन्मादा विंश
तिः स्युस्ते देवाद्दानवादपि गंधर्वात्किन्नराद्यक्षात्पितृभ्यो गुरुशापतः प्रेताच्च गुह्यकाद्वृद्धात् सिद्धात्पिशाचतः
जलाधिदेवतायाश्च नागाच्च ब्रह्मराक्षसात् राक्षसादपि कूष्मांडात्कृत्या वेतालयोरपि अपस्मारश्चतुर्द्धा स्यात् स
मीरात्पित्ततस्तथा श्लेष्मणोऽपि तृतीयः स्याच्चतुर्थः सन्निपाततः चत्वारश्चामवाताः स्युर्वातपित्तकफैस्त्रिधा
चतुर्थः सन्निपाताच्च शूला अष्टौ प्रकीर्तिताः पृथक् दोषैस्त्रिधा द्वंद्वभेदेन त्रिविधान्यपि आमेन सप्तमं प्रो
क्तं सन्निपातेन चाष्टमं परिणामभवं शूलमष्टधा परिकीर्तितम् मलैर्द्वैः ...संख्यास्तैरेव परिणामजं अन्न

शा॰ पू॰ द्वंद्वजं त्रैरकपित्तभवं तथा एकैकं गाणितं तज्ज्ञैरुदावर्तास्त्रयोदश एकः स्यान्निग्रहाच्छ्रोक्तस्तस्मारोधाद्वितीयकः
१४ निद्राघातात्तीयस्याच्चतुर्थश्वाससनिग्रहात् छर्दिरोधात्पंचमः स्यात्षष्ठः क्षवथुनिग्रहात् जंभारोधात्सप्तमः
स्यादहारग्रहतोष्टमः नवमः स्यादश्रुरोधाद्दशमः शुक्रधारणात् मूत्ररोधान्मलस्यापि रोधाद्वातविनिग्रहात् ३
दावर्तास्त्रयश्चैते चोरोपद्रवकारका आनाहो द्विविधः प्रोक्तो एकः पक्वाशयोद्भवः आमाशयोद्भवश्चान्यः
प्रसानाहः सकथ्यते ३ रोगमहस्तथा चैको हृद्रोगाः पंचकीर्तिता वातादिभिस्त्रयः प्रोक्ताश्चतुर्थः सन्निपाततः पं
चमः कृमिसंजातस्तथा ष्ठीलावुद्दतार्गिन्तु वातात्पित्तात्कफात्ष्ठीर्ण्ण त्रिदोषेभ्योऽजलोदरपि प्लीहा क्षताद्दुगुदाद
ष्टमं परिकीर्तितं गुल्मास्त्वष्टौ समाख्याता वातपित्तकफैस्त्रयः द्वंद्वभेदैस्त्रयः प्रोक्ताः सप्तमः सन्निपाततः रक्ता
ष्टमकः ख्यातो मूत्राघाता त्रयोदश वातकुंडलिका पूर्वा वातात्सीलाततः परा वातवस्तिस्तृतीयः स्यान्मू राम
त्राघात श्चतुर्थकः पंचमं मूत्रजठरं षष्ठो मूत्रक्षयः स्मृतः मूत्रोत्संगः सप्तमः स्यान्मूत्रग्रंथिस्तथाष्टमः १४

मूत्रशुक्रं चनवमं विड्घातो दशमः स्मृतः मूत्रसादश्चोष्णवातो वर्तोपस्तिकुंडलिका तथा त्रयोदशैते मूत्राघाताः
पृथक् घोराः प्रकीर्तिताः मूत्रकृच्छ्राणि चाष्टौ स्युर्वातात्पित्तात्कफात्त्रिधा सन्निपाताच्चतुर्थः स्यात् शुक्रकृच्छ्रं
च पंचमं विट्कृच्छ्रं शष्टमाख्यातं वातकृच्छ्रं च सप्तमं अष्टमं चाश्मरीकृच्छ्रं च तुष्टौ चाश्मरी मता वातात्पित्ता
पिष्टमेह त्कफात् शुक्रात् तथा मेहाश्च विंशतिः इक्षुमेहः सुरामेहश्च सांद्रकः शुक्रमेहो दकाख्यो च लालामेहश्च शीत
कः सिकताकः शनैर्मेहो दशैते कफसंभवाः मञ्जिष्ठाख्यो हरिद्राख्यो नीलमेहश्च रक्तकः कृष्णमेहः क्षारमेहः षडे
ते पित्तसंभवः हस्तिमेहो वसामेहो मज्जामेहो मधुत्तमः चत्वारो वातजा मेहा इति मेहाश्च विंशतिः सोमरोगस्त
थैकः प्रमेहपिटिका दश शराविका कच्छपिका पुत्रिणी विनतालजी मसूरिका सर्षपिका जालिनी च
विदारिका विद्रधिश्च दशैताः स्युः पिडका मेहसंभवा मेदोदोषस्तथैकः शोथरोगा नव स्मृताः दोषैः
पृथक् द्वयेः सर्वैरभिघाताद्द्विधापि [illegible] सम्यगरिता वातात्पित्तात्कफेन च रक्तेन मेदसा तथा

रोगस्तंदोषवैषम्यं दोषसाम्यमरोगता

शा०प्र० १५

द्विश्च सप्तमः ॥ कंठे च द्विस्तालुकायां चैकात पैका गंडमालिका गंडगंडालजीति चैकास्यांद्रिष्ययोनवधामता।
त्रिभिर्दोषैस्तथा रक्तात् शिराभिर्मेदसो व्रणात् ॥ तथा मांसेन नव वा: षड्विधं स्यात पाके ह वातात्पित्ता
त्कफाद्रक्तान्मांसादपि च मेदसः ॥ श्लीपदश्च त्रिधा प्रोक्तो वातात्पित्तात्कफादपि विद्रधिः षड्विधः स्या
त्तो वातो पित्त कफे स्वयः रक्तात्क्षतात्त्रिदोषैश्च व्रणाः पंचदशोदिताः ॥ तेषां चतुर्द्धी भेदाः स्युरागंतुर्दे
हजस्तथा शुद्धो दुष्टश्च विज्ञेयस्तत्संख्या कथ्यते ऽथ च वातव्रणः पित्तजश्च कफजो रक्तजो व्रण
वातपित्तभवश्चान्यो वातश्लेष्मभवस्तथा तथा पित्तकफाभ्यां च सन्निपातेन चाष्टमः नवमो वात
रक्तेन दशमो रक्तपित्ततः श्लेष्मरक्तभवश्चान्यो वातपित्तास्रगुद्भवः वा[illegible]
तश्लेष्मास्रसमुत्पन्नः पित्तश्लेष्मास्रसंभवः सन्निपातास्रगुद्भूत इति पंचदश व्रणाः ॥ सद्यो व्रणास्तथा राम
गुण्या स्यादवलिहितविलंबिविलंबितौ छिन्नभिन्नप्रचलिता घृष्टविद्धनिपातिताः कोष्ठभेदो द्विधा १५

प्रोक्ताः छिन्नांत्रोन्निस्रुतांत्रकः । अस्थिभंगोष्टधा प्रोक्तो भग्नपिष्ट विदारिता विवर्तिश्च विश्लिष्टस्तिर्य
क्क्षिप्तस्तथोगतः ॥ उद्गुगः संधिभग्नश्च वन्हिदग्धः स्वतुर्विधः । प्लुष्टो विदग्धो दुर्दग्धः सम्यग्दग्धः प्र
कीर्तितः । नाडीः पंचसमाख्याता वातपित्तकफैस्त्रिधा त्रिदोषैरपि शल्येन तथाष्टौ स्युर्भगंदराः । शतपोन
स्तु पवनादुष्ट्रग्रीवश्च पित्ततः । परिस्रावी कफाज्ञेयस्त्रगुवीत कफोद्भवः । परिक्षेपी मरुत्पित्तादर्शोजः । कफ
पित्ततः । आगंतुजातश्चोन्मार्गी शंखावर्तस्त्रिदोषजः । मेढ्रे पंचोपदंशाः स्युर्वातपित्तकफैस्त्रिधा सन्नि-
पातेन रक्ताच्च मेढ्रे शूककामयास्तथा चतुर्विंशति संख्यातास्तिंगार्शोग्रपिततं तथा निवृत्तमवमंथश्च मर्दितं
शतपोनकः । अष्ठीलिका सर्षपिका त्वक्पाकश्चावपाटिका मांसपाकः स्पर्शहानिर्विरुद्धमणिर्हन्नतः
मांसार्बुदं पुष्करिका संमूढपिडकालजी रक्तार्बुदं विद्रधिश्च कुंभिका तिलकालकाः । विरुद्धव्रणकः प्रो
क्तस्तथैव परिवर्तिका कुष्ठान्यष्टादशोक्तानि वात्कपालिकं भवेत् पितेनौडुंवरं प्रोक्तं कफान्मंडलचर्चिके

मा०न० मसूरिका दक्षजिव्हं श्लेष्मवाता द्विपादिका तथासिध्मैककुष्टं चकिटिभं चालसं तथा कफतास्तु नहीद्रं पामावि
१६ स्फोटकं तथा महाकुष्टं च मिद्दलं पुंडरीकं शतारुकः त्रिदोषैः काकणं ह्येपं तथान्यत् चित्रसंज्ञितं तच्च वातेन
पित्तेन [illegible] श्लेष्मणा च त्रिधा भवेत् क्षुद्ररोगाः षष्टिसंज्ञास्तेष्वादौ शर्कराबुंदं इंद्रवृद्धा पनसिका विवृतां
त्रालजी तथा वराहदंष्ट्रो वल्मीकं कच्छपी तिलकालकं गर्दभी रकसा चैव यवप्रख्या विदारिका कदरं म
कश्चैव नीलिका जालगर्दभः इरिवेल्लो मनुमण्यि गुदभ्रंशोऽग्निरोहिणी सन्निरुद्धगुदः गुष्टः कुनखोऽ
नुशयी तथा पद्मिनीकंटकाख्यं विध्यमलमुखदूषिका कच्छा वृषणकच्छू श्वगंधपाषाणगर्दभः गजिका
च तथा व्यङ्गश्चतुश्चत्वारी परिकीर्तितः वातात्पित्तात्कफाद्रक्तादित्युक्तं व्यंगलक्षणं विस्फोटाः क्षुद्ररोगेषु तेष्ठ गो
ष्ठा परिकीर्तिताः पृथक् दोषैस्त्रयो द्वंद्वैस्त्रिविधः सप्तमोऽस्रजः अष्टमः सन्निपातेन क्षुद्ररुक् समस्त राम
प्र रिका चतुर्द्दशं कारेण त्रिभिर्द्दोषैस्त्रिधा च सा द्वंद्वजाति त्रिधा प्रोक्ता सन्निपातेन सप्तमी अष्टमी वल्कि १६

साहनवसंस्थाभिघातजः तथैवश्लेष्मरक्ताभ्यामुदर्द्दः परिकीर्तितः वातपित्तेन चैकश्च शीतपित्तामयः स्मृतः॥अ
स्रपित्तं त्रिधा प्रोक्तं वाते श्लेष्मणा तथा तृतीयं श्लेष्मवाताभ्यां वातरक्तं तथाऽष्टधा वाताधिकेन पित्ताधिक
फा दोषत्रयेण च रक्ताधिक्येन दोषाणां द्वंद्वेन त्रिविधः स्मृतः॥ अशीतिर्वातजा रोगाः कथ्यंते मुनिभाषिताः॥
॥आक्षेपको हनुस्तंभ ऊरुस्तंभः शिरोग्रहः बाह्यायामोंतरायामः पार्श्वशूलं कटीग्रहः दंडापतानकः खल्ली
जिह्वास्तंभस्तथार्दितं पक्षाघातः क्रोष्टुशीर्षं मन्यास्तंभश्च पंगुता कलापखंजता तूनी प्रतितूनी च खंज
ता पादहर्षो गृध्रसी च विश्वाची चावबाहुकः॥ अपतानो व्रणायामः वातकंटोऽपतन्त्रकः॥ अंगभेदोंऽग
शोषश्च मिन्मिनत्वं च कलता प्रत्यष्ठीलाष्ठीलिका च वामनत्वं च कुब्जता॥ अंगपीडांगशूलं च संकोचः
स्तंभरूक्षते॥ अंगभंगोंऽगविभ्रंशो विड्ग्रहो बद्धविट्कता मूकत्वमतिजृंभास्यादत्युद्गारोंत्रकूजनं वातप्रवृत्तिः
स्फुरणं शिराणां पूरणं तथा कंपः कार्श्यं श्यामता च प्रलापः क्षिप्रमूत्रता निद्रानाशः स्वेदनाशो दुर्बलत्वा

शा०ध० ध्वबलक्षयः ॥ प्रतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः ॥ अनवस्थितचित्तत्वं काठिन्यं विरसास्यता क
१७ षायवक्त्रताध्मानं प्रत्याध्मानं शीतता रोमहर्षश्च भीरुत्वं तोदः कंडूरसाज्ञता शब्दाज्ञता प्रसुप्तिश्च गंधा
ज्ञत्वं दृष्टिःक्षयः ॥ अथ पित्तभवा रोगाश्चत्वारिंशदिहोदिता ॥ धूमोद्गारो विदाहः स्यादुष्णांगत्वमतिभ्रमः कां
तिहानिः कंठशोषो मुखशोषोऽल्पशुक्रता तिक्तास्यताऽम्लवक्त्रत्वं स्वेदस्रावोंगपाकता क्लमो हरितवर्ण
त्वमतृप्तिः पीतकायता रक्तस्रावोंऽगदरणं लोहगंधास्यता तथा दौर्गंध्यं पीतमूत्रत्वमरतिः पीतविट्कता पी
तावलोकनं पीतनेत्रता पीतदंतता शीतेच्छा पीतनखता तेजोद्वेषोऽल्पनिद्रता कोपश्च गात्रसादश्च भिन्नवि
ट्कत्वमंधता उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च तमसो दर्शनं पीतमंडलानां च दर्शनं निःसहत्वं च
पित्तस्य चत्वारिंशद्रुजः स्मृताः कफस्य विंशतिः प्रोक्ता रोगास्तन्द्रातिनिद्रता गौरवं मुखमाधुर्यं मुखलेपः ताम
प्रसेकिता श्वेतावलोकनं चैव श्वेतविट्श्वेतमूत्रता श्वेतांगवर्णता शैत्यमुष्णेच्छा तिक्तकामिता ब १७

लाधिकं च शुक्रस्य बाहुल्यं बहुमूत्रता ७ आलस्यं मंदबुद्धित्वं तंद्रा निद्रा च धैरवाक्यता ॥ अचैतन्यं च गारिता विं
शतिः श्लेष्मजा रुजाः रक्तस्य च दश प्रोक्ता व्याध्य यत्ते पु गौरवम् रक्तमंडलता रक्तनेत्रत्वं रक्तमूत्रता रक्तनि
ष्ठीवनं रक्तविस्फोटानां च दर्शनं ॥ शोथं च पूतिगंधत्वं पीडापाकश्च जायते चतुःसप्ततिसंख्याता मुख
रोगास्तथोदिताः तेष्वष्टरोगा गदिता एकादश मिता बुधैः वातपित्तकफैस्त्रेधा त्रिदोषैरसृजा तथा स
तनं सार्बुदं चैव स्वभेदात्[illegible] : ओष्ठसंजन्मार्बुदं मेदोर्बुदं चार्बुदं च रोगा एकादशोष्ठजाः दंतरोगा दश
ख्याता दालनः कृमिदंतकः दंतहर्षः करालश्च दंतचालश्च शर्करा ॥ अधिदंतः श्यावदंतो दंतभेदः कपा
लिका तथाऽत्र योदश मिता दंतमूलामयाः स्मृताः शीतादोपकुशौ द्वौ तु दंतविद्रधिपुप्पुटे ॥ अधिमांसो वि
दर्भश्च महाशुषिरशौषिरौ तेषु वंगतयः पंच वाता पित्तात्कफादपि सन्निपातगतिश्चान्या रक्तनाडी च पंच
मी तथा जिह्वामयाः षट् स्युर्वातपित्तकफैस्त्रिधा ॥ अलसश्चोपजिह्वः स्यादधिजिह्वा च पंचमी षष्ठी चैवो

कर्णरोगाः समाख्याता अष्टादशमिता बुधैः । वातात्पित्तात्कफाद्रक्तात्सन्निपाताच्च विद्रधेः शोथोऽर्बुदं प्रतिकर्ण्णस्य शः

शा० ध० यजिह्वास्यात्तथाष्टौ तालुजा गदाः । अर्बुदं तालुपिडका च्छ्या तालुसंहतिः । गलशुण्डी तालुशोषः तालुपा-
१८ कश्च पुप्पुटः । गलरोगास्तथाख्याता अष्टादशमिता बुधैः । वातरोहिणिका पूर्वं द्वितीया पित्तरोहिणी क-
फरोहिणिका प्रोक्ता त्रिदोषैरपि रोहिणी मेदोरोहिणिकावंशो गलौघो गलविद्रधिः । स्वरघ्नस्तुण्डिकेरी च स-
तघ्नी शालूकमेवेदं गिलायुर्वलयश्चापि वाततगंडः कफात्तथा मेदोगंडस्तथैकः स्यादित्यष्टादश कण्ठजाः । मुखं
तसंभवा रोगाः अष्टौ ख्याता महर्षिभिः । मुखपाको भवेद्वातात्पित्तात्तद्वत्कफादपि रक्ताच्च सन्निपाताच्च पू-
त्यास्योर्ध्वगुदावपि अर्बुदं चेति मुखजाश्च ये तु सप्ततिरामयाः । कर्णहल्लिका व्याधिर्येतं त्रिकाकंडूः शा-
ष्कुलीक ... मिकर्णकः कर्णनाडश्च तीनाहस्त्वष्टादश कर्णजा कर्णपालिसमुद्भूता रोगाः सप्तदशोदि-
ताः उत्पात पाली शोषश्च विदारीद्वः स्ववर्द्धनी परिपोटश्च लेहीच पिप्पली चेति संस्मृताः कर्णमला नाम
मयाः पंचवातात्पित्तात्कफादपि सन्निपाताच्च रक्ताच्च तथा नासासमभवा गदाः अष्टादशैव संख्याताः । घ्र १८

तिश्या पस्तुतेष्वपि वातात्पित्तात्कफाद्रक्तात्सन्निपातेन पंचमः सपीनसः पूतिनाशो नासार्शश्च भ्रंशथुः क्षवः
नासानाहः पूतिरक्तमर्बुदं दुष्टपीनसं नासाशोषो घ्राणपाकः पूरकः स्रावदिप्तकं तथा दश शिरोरोगा वा
तेनार्द्धावभेदकं शिरस्तापश्च वातेन पित्तपीडा तृतीयका चतुर्थी कफजा पीडा रक्तजा सन्निपातजा सूर्या
वर्तोच्छिरः पाकात्क्रिमिभिः शंखकेन च तथा नेत्रभवाख्याताश्चतुर्नवतिरामयाः तेषु वर्त्मगदाः प्रो
क्ताश्चतुर्विंशतिसंमिताः कृच्छ्रोन्मीलः पक्ष्मघातः कफोत्क्लिष्टश्च लोहितः स्तिमिमेषः कर्दमश्च नरक्तोत्क्लिष्टं कुक्
णकं पक्ष्मार्शः पक्ष्मरोधश्च पित्तोत्क्लिष्टश्च पोथकी [illegible] श्लिष्टवर्त्मा च बहलः पक्ष्मोत्संगस्तथार्बुदं कुंभिका
सिकतावर्त्म लगणं गंजननामिका तथैव स्याद्वर्त्म तथा लजी उत्क्लिष्टवर्त्मेति गदाः प्रोक्ता वर्त्मसमुद्भवाः ने
त्रसंधिसमुद्भूताः नेत्ररोगाः प्रकीर्तिताः जलस्रावः कफस्रावो रक्तस्रावश्च पर्वणी पूयस्रावः क्रिमिग्रंथि
रुपनाहस्तथालजी पूयालस इति प्रोक्ता रोगा नयनसंधिजाः तथा सितगता रोगाः बुधैः प्रोक्तास्त्रयोदश
तथा कपालरोगास्तु नवैते षू पशीर्षकं [illegible] पिडिका विद्रधिश्च दारुणं चिप्र कार्बुदं इंद्रलुप्तं च खलतिः पलितं चेति तेन च ४

प्रा० ५०
१९

सिरोत्पातः शिराहर्षः सिराजालश्च शुक्तिका शुक्लार्मा चाधिमांसार्मा प्रस्तार्यर्मा च पिष्टकः सिरायाः
पिडका चैव कफग्रथितकोऽर्जुनः स्नाय्वर्मा चाधिमांसः स्यादिति शुक्लगता गदाः तथा कृष्णसमुद्भूताः पं
चरोगाः प्रकीर्तिताः शुद्धशुक्रं सिराशुक्रं क्षतशुक्रं तथाऽजका सिरासंगश्च सर्वे पि प्रोक्ताः कृष्ण
गतागदाः काचं तु षड्विधं प्रोक्तं वातात्पित्तात्कफादपि सन्निपातात्तथा रक्तात्षष्ठं संसर्गसंभवं तिमिराणि
षडेव स्युर्वातपित्तकफैस्त्रिधा संसर्गेन च रक्तेन षष्ठं स्यात्सन्निपाततः लिङ्गनाशः सप्तधा स्याद्वातपित्ता
त्कफेन च त्रिदोषैरुपसर्गेण रक्तात्संसर्गतस्तथा अष्ट्याद्दृष्टिरोगाः स्युस्तेषु पित्तविदग्धकं अम्ल
पित्तविदग्धं च तथैवोष्णविदग्धकं नकुलान्ध्यं धूमरान्ध्यं रात्र्यन्ध्यं ह्रस्वदृष्टिकः गंभीरदृष्टिरित्येते रोगा
दृष्टिगताः स्मृताः चत्वारश्चाधिमंथाः स्युर्वातपित्तकफास्रजः अभिष्यंदाश्च चत्वारो रक्तादोषैस्त्रिभि राम
स्त्रिधा सर्वाक्षिरोगाश्चाष्टौ स्युस्तेषु वातविपर्ययः ऽत्र्यशोफोऽन्यतोवाच्च तपाकात्ययः स्मृताः ॥ १९

श्चाक्षिपाकश्च तथा शोफोम्लोत्थितस्तथा च हताधिमंथ इत्येते रोगाः सर्वाक्षिसंभवाः पुंस्त्वदोषास्तु पं
चैव प्रोक्तास्तत्रेर्ष्यकः स्मृता ॥ आसेक्यश्चैव कुंभीकः सुगंधी पंढसंज्ञिता ॥ शुक्रदोषास्तथाष्टौ स्युर्वा
तात्पित्तात्कफेन च कुणपं श्लेष्मवाताभ्यां पूयाभं श्लेष्मपित्ततः क्षीणं च वातपित्ताभ्यां ग्रंथिश्च श्लेष्ममारुतात:
मलाभं सन्निपाताच्च शुक्रदोषा इतीरिता ॥ अथ स्त्रीरोगनामानि प्रोच्यंते प्रविशेषतः ॥ अष्टौ वातेन रोगाः
स्युर्वातपित्तकफैस्त्रिधा पूयाभं कुणपं ग्रंथिक्षीणं मलसमं तथा तथा च रक्तप्रदरं च चतुर्विधमुदाहृतं वात
पित्तकफैस्त्रेधा चतुर्थः सन्निपाततः विंशतिर्योनिरोगाः स्युर्वातात्पित्तात्कफादपि सन्निपाताच्च रक्ता
च्च लोहितक्षयतस्तथा शुष्का च वामिनी चैव खंडिताऽंतर्मुखी तथा सूचीमुखी विप्लुता च जाता च परिप्लुता
उपप्लुता प्राक्चरणा महायोनिःस्याद्वमता कर्णिका चातिचरणा योनिरोगा इतीरिताः ॥ चतुर्विधो योनिकं
दः वातपित्तकफैस्त्रिधा चतुर्थः सन्निपाततः तथाष्टौ गर्भजा रोगाः उपविष्टकगर्भः स्यात्तथा नागोदरः स्मृता

शा०ध०
२०

मकश्चोमूढगर्भश्च विष्कंभो मूढगर्भकः जरायुदोषो गर्भस्य पातश्चाष्टमकः स्मृतः पंचैव स्तनरोगाः स्यु
र्वातात्पित्तात्कफादपि सन्निपातात्क्षतात्चैव तथा स्तन्योद्भवा गदाः बालरोगेषु कथिताः स्त्रीदोषाश्च
त्रयः स्मृताः ग्रहदोषपुरुषोत्पन्नः सपत्नीविहितस्तथा दैवाज्ञातस्तृतीयः स्तन्यपायेरतिका गदाः
ज्वरादयश्चिकित्स्यास्ते यथा दोषं यथाबलं द्वाविंशतिर्बालरोगास्तेषु क्षीरालसास्त्रयः वातात्पित्ता
त्कफाच्चैव दंतोद्भेदश्च तुर्यकः दंतघातो दंतशब्दो कालदंतो हि पंचमं मुखपाको मुखस्रावो गुदपाको
पपीडिका पार्श्वारुण्यं तालुकंटो विच्छिन्नं परिगर्भकः दौर्बल्यं गात्रशोषश्च तथा मूत्रं कुकूणकः रो
दनं चाजगल्लीस्यादिति द्वाविंशतिः स्मृताः तथा बालग्रहाः ख्याताः द्वादशैव मुनीश्वरैः स्कंदग्रहो वि
शाखः स्याच्छ्वग्रहश्च पितृग्रहः नैगमेषग्रहस्तद्वत् शकुनिः शीतपूतना मुखमंडितिका तद्वत् पूत
ना चांधपूतना रेवती चैव संख्याता तथा स्यात् शुष्करेवती तथा चरणमेयास्तु वातरक्तोदिताश्चये ते

राम
२०

पिरोगेषु गणिताः पंचकर्मोक्तानतेऽत्र किंचित् हीनमिथ्यातियोगानां भेदैर्यं च दशोदिताः पंचकर्मभ
[illegible] वा रोगास्ते पिरोगेषु संज्ञिताः स्नेहस्वेदौ तत्पाश्चात्य मोगं रूक्षो जनन त पिण्डे ॥ अष्टादशोत्तमा पी
[illegible] नस्ताश्च गणेषु लक्षिताः धीतोपद्रवकः स्यादेकश्चोष्ठभवो गतः प्राप्तोपद्रवकश्च क्षारश्चैकः स्म
त्तथा स्थावरं जंगमं चैव कृत्रिमं च त्रिधा विषम् तेषां च कालकूटाद्यैर्नवधा स्थावरं विषम् जंगमं बहुधा
प्रोक्तं तत्र लूता भुजंगमाः वृश्चिकाश्च मूषिकाः कीटाः तेषां चतुर्विधाः दंष्ट्राविषं लालाश्चं गात्रस्थिमि
त्तथा मत्रात्पुरीषाच्छुक्राच्च दृष्टेर्निश्वासतस्तथा लालायाः स्पर्शतस्तद्वत्तथा शंका विषं मतं कृत्रिमं
द्विविधं प्रोक्तं गरदूषी विभेदतः सप्तधातुविषं ज्ञेयं तथा सप्तोपधातुजं तथैवोपविषेभ्यश्च जातं सप्तविषं स्मृतं
दुष्टनीरं विषं चैकं द्विग्धजं विषं कपिकच्छुभवाकं दुर्दुष्टनीरभवात तथा तथाहरणकं दूष्यश्च शोथो मद्यात्तजस्त
था मत्स्यश्चतुर्विधश्चानः परागमंगाक्ष्यकोद्भवैः इति प्रसिद्धा गणितायकिलोपद्रवा मुवि ॥ प्रसंरत्नायापरे

ब्रह्मणां
चतुर्विधोऽन्योद्भवाणां फललवगम्यपत्रजः

म

शा०ध०
२१

धातुमलजीवादिसंभवाः॥ ॥छ॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां निदानेरोग
गणनासंख्यानाध्यायः॥ इति पूर्वखंडः॥ अथ पात्रे स्वरसः कल्कः क्वाथश्च हिमफांटकौ ज्ञेयाः कषायाः पं
चैते लघवः स्युर्यथोत्तरं॥ तत्र स्वरसकल्पना आहतात्तत्क्षणाकृष्टाद्द्रव्यात्क्षुण्णात्समुद्धरेत् वस्त्रनि:
पीडितो यः स्वरसो रस उच्यते कुडवं चूर्णितं द्रव्यं क्षिप्तं च द्विगुणे जले अहोरात्रस्थितं तस्माद्भवेद्वा रस
उत्तमः आदाय शुष्कद्रव्यं वा स्वरसानामसंभवे जलेष्टगुणिते साध्यं पादशिष्टं च गृह्यते स्वरसस्य गुरु
त्वाच्च पलमर्द्धं प्रयोजयेत् निशोषितं चाग्निसिद्धं पलमात्रं रसं पिबेत् सितामधुगुडक्षारान् जीरकं लवणं
तथा घृतं तैलं च चूर्णादीन् कोलमात्रान् रसे क्षिपेत् स यथा अमृतायारसः क्षौद्रयुक्तः सर्वप्रमेहजित् ह
रिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः वासकस्वरसः पेयो मधुना रक्तपित्तजित् ज्वरकासक्षयहरः का
मलाश्लेष्मपित्तहा त्रिफलायारसः क्षौद्रयुक्तो दार्वीरसोऽथवा निम्बस्य वा गुडूच्या वा पीतो जयति कामलाम् २१

(Interlinear glosses: कषायपञ्चवाख्याः; आमलका; मधु; मधु; दारुहरिद्रा)

पीतो मरिचचूर्णेन तुलसीपत्रजो रसः द्रोणपुष्पीरसो वापि निहंति विषमज्वरान् जंबाम्रमल्लकीनां च
पल्लवोत्थो रसो जयेत् मध्वाज्यक्षीरसंयुक्तो रक्तातीसारमुल्वणम् स्थूलबब्बूलिकापत्ररसः पा
नाद्व्यपोहति सर्वातिसारान् श्योनाककुटजोत्वग्रसोऽपवा ७आर्द्रकस्वरसः क्षौद्रयुक्तो वृषसावा
तनुत् श्वासकासारुचिं हन्ति प्रतिश्यायं व्यपोहति। बीजपूररसः पानात्मधुक्षारयुतो जयेत् पा
र्श्वहृद्वस्तिशूलानि कोष्ठवायुं च दारुणम् एतावयोमूत्र मधुना पित्तशूलहरो रसः निशाचूर्णयुतः
कन्यारसः प्लीहापचीहरः न्यालवुघायाः स्वरसः पीतो द्विपलमात्रया ७अपचीगंडमालानां काम
लायाश्च नाशनः शुण्ठीमुंडरसः कोष्णो मरिचैरवधूलितः जयेत्सप्तदिनाभ्यासात्सर्व्याधीन्वर्तीः हैमद
को ब्राह्मीकूष्मांडपर्ण्याणां त्रिनीस्वरसाः पृथक् मधुकुष्ठयुताः पीताः सर्वोन्मादापहारिणः कूष्मां
डकस्य स्वरसो गुडेन सह योजितः दुष्टकोद्रवसंजातं मदं पानाद्व्यपोहति खड्गादिच्छिन्नगात्रस्य तत् का

गां रसकरी

शा० ध० लंपूरि[illegible]तोदरः गांगेरुकीमूलरसैर्जीयते गतवेदनः ॥ ७ अथ पुटपाकः पुटपाकस्य का

मात्रेयं

त्वकं रसो गृह्यते यतः ७ अत्रतत्तु पुटपाकानां मानं क्रियत्रोच्यते मया पुटपाकस्यं लेपस्यांगारवर्णता ले
२२

पंच द्व्यङ्गुलं स्थूलं हू ७ ङ्गुष्ठमात्रकम् काश्मरीवटजंब्वादिपत्रैर्वेष्टनमुत्तमम् पलमात्रो रसो ग्राह्यः

करैया

कर्षमात्रं मधु क्षिपेत् कल्कचूर्णद्रवा धात्तु देयाः स्वरसवद्बुधैः सद्यपा तत्कालाकृष्टकुटजंत्व

चं तंडुलवारिणा पिष्टां चक्रुः पलमितां जंबूपत्रैर्वेष्टितां सूत्रेण बध्वा गोधूमपिष्टेन परिवेष्टितं

लिप्तां च घनपंके न गोमये वह्निना दहेत् ७ अङ्गारवर्णां च मृदं दृष्ट्वा वह्नेः समुद्धरेत् ततो रसं गृही

इति पुटतिसारे

त्वा च शीतं क्षौद्रयुतं पिबेत् जयेत् सर्वानतीसारान्दुस्तरान् सुचिरोत्थितान् कुटजपुटपाकः कण्डितं

तंडुलपलं जलेष्टगुणे निक्षिपेत् भावयित्वा जलं ग्राह्यं देयं सर्वत्र कर्मसु इति तंडुलजलम् ७ अथ श्लक्ष्णकृ राम

सेवरकागोंद इति अतिसारे तितिरपक्षि

तं श्वेतं पुटपाको निरीपनः मधु मोचरसाभ्यां च युक्तः सर्वातिसारनुत् ७ अथ श्लक्ष्णपुटपाकः न्यग्रोधा २२

43

न्यग्रोधोदुम्बराश्वत्थशिरीषप्लक्षपादपाः।। पञ्चैते क्षीरिणस्तेषां त्वक पञ्चवल्कलम्
५।

देश्वकल्केन पूरयेद्धौ रतित्तिरेः । निरंत्रमुदरं सम्यक् पुटपाकेन तत्पचेत् तत्कल्कस्वरसः सौद्रयुक्तः
इति सतिसारे तित्तिरिपुटपाक
सर्वातिसारनुत् तित्तिरिपुटपाकः पुटपाकेन विपचेत्पक्वं दाडिमीफलम् तद्रसं मधुसंयुक्तः स
विपचेत्पुटपाकेन क्षौद्रयुक्तस्य तद्रसः
इति तीसारे संमु टपाक
र्वातीसारनाशनः दाडिमीपुटपाकः बीजपूराम्रजंबूनां पल्लवानि जटाः पृथक् विपचेत्पुटपा
इति छर्द्यां पल्लवपुटपाक
केन क्षौद्रयुक्तस्तु तद्रसः छर्दिं निवारयेद्घोरां सर्वदोषसमुद्भवाम् [illegible] पल्लवपुटपाकः
पिष्टानां वृषपत्राणां पुटपाकरसो हि सः मधुयुक्तो जयेद्रक्तपित्तकासज्वरक्षयान् वासापुटपा
इति कासे कंटकारीपुटपाक
कः पचेत्क्षुद्रां समूलपंचांगां पुटपाकेन तद्रसः पिप्पलीचूर्णसंयुक्तः कासश्वासक्षयापहः ।। कंटकारी
पुटपाकः विभीतकफलं किंचित्घृतेनाभ्यज्य लेपयेत् गोधूमपिष्टेनाङ्गारे विपचेत्पुटपाकवत् ततः पक्वसमु
इति स्वरभङ्गे विभीतकपुटपाकः
द्धृत्य चैतस्य मुखे क्षिपेत् कासश्वासप्रतिश्याय स्वरभंगान् जयेत्ततः विभीतकपुटपाकः चूर्णं किंचि
त्घृताभ्यक्तं स्नुक्क्षीरो रंडजैर्दलैः । वेष्टितं पुटपाकेन विपचेन्मंदवह्निना ततउद्धृत्य तच्चूर्णं प्रातः सितास

शा०ध०
२३

इति शुंठीपुटपाकः
मं तेन यांति प्रशमं पीडा ह्यामातीसारसंभवः शुंठीपुटपाकः। शुंठीकल्कं विनिक्षिप्तं सैरेरंडमूलजे विपचे
इत्यामवाते द्वितीयः । शुंठीपुटपाके
त्पुटपाकेन तद्रसः क्षौद्रसंयुतः । आमवातसमुद्भूतां पीडां जयति दुस्तराम् द्वितीयशुंठीपुटपाकः। सोर
णं कंरमादाय पुटपाकेन [illegible]: पाचयेत् तत्तैललवणं सतरससम्यक्छोणि विकारनुत् अरलुपुटपाकः। श्या
इति हरिद्राश्योनाकपुटपाक
नांव संपुटे दग्धं श्योनाकहरिणं जं पिबेत्तं माक्षिकेन सर्पिषा पिबेत् ह्यामातीसारं नश्यति ध्रुवम् ॥ इति श्रीदामोदरसूनु
ना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने स्वरसादिकल्पनाऽध्यायः ॥ अथ पक्वाथकल्पना पानी
यं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत् मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितं तज्जलं पाययेद्धीमान् को
ष्णं मृद्वग्निसाधितं शृतं क्वाथः कषायश्च निर्यूहः स निगद्यते आहाररसपाके च संजाते द्विपलोन्मितम्
वृद्धवैद्योपदेशेन पिबेत्क्वाथं सुपाचितं क्वाथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः वातपित्तकफातंके विपरी
तं मधु स्मृतं जीरकं गुग्गुलं क्षारं लवणं च शिलाजतु हिंगु त्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत् क्षीरं घृतं

राम
२३

निंब

गुडं तैलं मज्जं चान्यद्द्रवं तथा कल्कं चूर्णादिकं क्वाथे निक्षिपेत् कर्षसम्मितम् सप्तम्या गुडूचीधान्यकारि

ष्टं पद्मकं रक्तचंदनं गुडूच्यादिगणः क्वाथः सर्वज्वरहरः स्मृतः दीपनो दाहहृल्लासतृष्णाछर्द्यरुची

इति सर्वज्वरे गुडूच्यादिक्वाथ

जयेत् गुडूच्यादिक्वाथः । गुडूचीपिप्पलीमूलनागरैः पीचनं स्मृतं दद्यात् वातज्वरे पञ्चमूलीं सप्तमवा

गुडूच्यादिपाचनं वातज्वरे सरिवन गोप

सरे गुडूच्यादिपाचनं वातज्वरे शालपर्णीबलारास्नागुडूचीसारिवा तथा द्राक्षासां क्वाथं पिबेत्कोष्णं

इति वातज्वरे क्वाथः शालिपर्ण्यादि

तीव्रवातज्वरच्छिदम् ॥ शालपर्ण्यादि काश्मरीसारिवाद्राक्षात्रायमाणाऽमृताभवः कषायः सगुडः

पीतो वातज्वरविनाशनः काश्मर्यादिः कट्फलेन्द्रयवांबष्ठातिक्तामुस्तैः शृतं जलम् पाचनं दशमेऽह्नि स्या

पित्तपापडा अरूषा जवास

त्तीव्रे पित्तज्वरे नृणाम् कट्फलादिपाचनं ज्वरे पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः प्रियंगु ।

इति पित्तज्वरे क्वाथ

श्च कृतः क्वाथ एषां पित्तज्वरापहः शर्करयायुतः पिपासादाहपित्तास्रयुक्तं पित्तज्वरे [illegible] जयेत् द्राक्षा

हरीतकीमुस्तंकटुकीकृतमालकः पर्पटश्च कृतः क्वाथ एषां पित्तज्वरापहः तृष्णामूर्च्छादाहपित्तास्र

शा० प०
२४

कृष्णमनोभेदनः स्मृतः द्राक्षादिः बीजपूरशिफापथ्यानागरग्रन्थिकैः स्मृतं सक्षारं पाचनं श्लेष्मज्वरे हृद्
ग्रहश्वासरे बीजपूरादिपाचनं श्लेष्मज्वरे ॥ निम्बनिम्बपिप्पल्यः शुंठी शतावरी गुडूची बृहती चैव
पाठा क्वाथो हन्यात्कफज्वरम् ॥ निम्बादिः पटोलत्रिफलातिक्तारोहिणी वासा ऽमृताभवः क्वाथो मधुयुतः पी
तो हन्यात्कफसंभवं ज्वरं पटोलादिः पर्पटाब्दामृताविश्वकैरातैः साधितं जलम् पंचभद्रमिदं ज्ञेयं वा
तपित्तज्वरापहम् पञ्चभद्रम् क्षुद्रा शुंठी गुडूचीनां कषायः पौष्करस्य च कफवाताधिकेपि ज्वरे वापि
त्रिदोषजे कासश्वासारुचिकरे पार्श्वशूले विधायिनि लघुक्षुद्रादिः आरग्वधकणामूलमुस्ता
तिक्ताभयाकृतः क्वाथः शमयति क्षिप्रं ज्वरं वातकफोद्भवम् आमशूलप्रशमनो भेदी दीपनपाचनः आ
रग्वधादिः अमृतारिष्टकटुकामुस्तेन्द्रजवनागरैः पटोलं चंदनाभ्यां च पिप्पलीचूर्णयुक्शृतं अमृता
ष्टकेन श्लेष्मपित्तश्लेष्मज्वरापहम् छर्दिरोचकहृल्लाससदाहतृष्णानिवारणम् अमृताष्टकम् कंटका

राम
२४

(इतिपित्तश्लेष्मज्वरेपाचनम्)

रीहव्यं शुंठीधान्यकं सुरदारु च एभिः शृतं पाचनं स्यात्सर्वज्वरविनाशनम् कंटकारीहव्यादिपाचनं सर्वज्व

(शालिवन पिठवन ... गोखरि। शेवनापाडी। खंभारि। पाडी)

रेषु शालपर्णीपृश्निपर्णीबृहतीद्वयगोक्षुरैः बिल्वाग्निमंथश्योनाककाश्मरीपाटलीयुतैः दशमूलमि-

ति ख्यातं क्वथितं तज्जलं पिबेत् पिप्पलीचूर्णसंयुक्तं वातश्लेष्मापहं परं सन्निपातज्वरहरं सूतिकादोषनाशनं

(मुखशोष) (काथ)

शोषशोथभ्रमस्वेदकासश्वासविकारनुत् हृत्कंठग्रहपार्श्वार्तितंद्रामस्तकशूलहृत् दशमूलं सन्निपातज्वरे।

(हरीतकी अडुलसा सुगंधवाला गिरिमाला पाठी कटुकी)

अभयामुस्तधान्याकरक्तचंदनपद्मकैः वासकेंद्रजवोशीरगुडूचीकृतमालकैः पाठानागरतिक्ताभिः पिप्पली

चूर्णयुक् शृतम् पिबेत्त्रिदोषज्वरजित् पिपासादाहकासनुत् प्रलापश्वासतंद्राघ्नं दीपनं पाचनं परम् विण्मू-

(चिरायता)

त्रानिलविष्टंभवमीशोषारुचिच्छिदं अभयादिसन्निपातज्वरे कैरातकटुकामुस्ताधान्येंद्रयवनागरैः द

शमूलमहादारुगजपिप्पलिकायुतैः कृतः कषायः पार्श्वार्तिसन्निपातज्वरं जयेत् कासश्वासवमीहि-

(इतिसन्निपातज्वरे अष्टादशांगकषायः। कायफल। मोथा। भारंगी। ... । ... इति ... । ककडाशृंगी)

क्कातंद्राहृद्रुक्नाशनः अष्टादशांगः कट्फलांबुदभार्गीमिश्रिधान्यरोहिषपर्प्पटैः वचाहरीतकीशृंगी

शा० प०
२५

देवदारुमहौषधो क्वाथः कासज्वरं हन्ति श्वासश्लेष्मगलग्रहान् कट्फलादिः क्वाथो जीर्णज्वरान् हन्ति गुडू
च्याः पिप्पलीयुतः त्रपापर्पटजः क्वाथः पित्तज्वरहरः परः जीर्णज्वरे निदिग्धिकाः मृताशुंठीकषायं पा
ययेद्भिषक् पिप्पलीचूर्णसंयुक्तं श्वासकासादितापहम् पीनसारुचिवैस्वर्ये स्लेष्मजीर्णज्वरच्छिदम् नि
दिग्धिका द्वितीयोज्वरे धन्वद्राक्षाधान्याक शुंठीभिगुडूचीमुस्तपद्मकैः रक्तचंदनभूनिंबपटोलवृषपौष्करैः क
टुकेंद्रजवारिष्ठभार्ङ्गीपर्पटकैः समैः क्वाथं प्रातर्निषेवेत सर्वशीतज्वरच्छिदम् वृहत्क्षुद्रादिः शीतज्वरे मु
स्ताक्षुद्रामृताशुंठीधात्रीक्वाथः समाक्षिकः पिप्पलीचूर्णसंयुक्तो विषमज्वरनाशनः मुस्तादिविषमज्वरे
पटोलत्रिफलानिंबद्राक्षाशम्याकवासकैः क्वाथः सितामधुयुतोजयेदैकाहिकंज्वर पटोलादिरेकाहि
पटोलादिरेकाहिकज्वरे गुडूचीधान्यमुस्ताभिश्चंदनोशीरनागरैः कृतंक्वाथं पिबेत् क्षौद्रसितायुक्तं ज्वरातुरः त
तीयज्वरनाशाय तृष्णादाहनिवारणम् गुडूच्यादिस्तृतीयज्वरे देवदार्वादिश्चातुर्थिकज्वरे गुडूचीधान्यकोशी

राम
२५

देवदारुशिवावासाशालिपर्णीमहौषधैः धात्रीयुक्तैः कृतं पीतं द्रुयामधुसितायुतम् चातुर्थिकं ज्वरं श्वासम् ...

49.

धात्रीखदिरयोः क्वाथं पीत्वा वल्गुजसंयुतम् पंरवे
नं च बलं श्वित्रं चूर्णं हन्ति न संशयः

शुंठीवालकपथ्यैः विल्वप्रतिविषापाठारक्तचंदनवत्सकैः किरातमुस्तेन्द्रयवैः क्वथितं शिशिरं पिबेत
सक्षौद्रं रक्तपित्तघ्नं ज्वरातीसारनाशनम् ॥ ह्रीबेरादि ॥ ज्वरातिसारे नागरं कुटजो मुस्तममृतातिविषा
तथा एभिः कृतं पिबेत् क्वाथं ज्वरातीसारनाशनम् ॥ नागरादिर्ज्वरातीसारे धान्यबालकबिल्वाब्दनागरैः
साधितं जलम् ॥ आमघ्नं ग्राहि दीपनं पाचनं परं ॥ धान्यपंचकम् ॥ धान्यनागरसः क्वाथः पाचनो दी
पनस्तथा ॥ एरंडमूलयुक्तः स जयेदामानिलव्यथाम् ॥ धान्यनागरं ॥ वत्सकातिविषाबिल्वमुस्तबालकजः शृ
तः ॥ अतीसारं जयेत्सामं चिरजं रक्तशूलजित् ॥ वत्सकादि ॥ कुटजातिविषापाठाधातकीलोध्रमुस्तकैः ह्रीवे
रदाडिमयुक्तैः कृतः क्वाथः समाक्षिकः ॥ पेयो मोचरसेनैव कुटजाष्टकसंज्ञकः ॥ अतीसारान् जयेद्घोरान् रक्त
शूलामदुस्तरान् ॥ कुटजाष्टकम् ॥ ह्रीवेरधातकीलोध्रपाठालज्जालुवत्सकैः धान्यकातिविषामुस्तागुडूचीबि
ल्वनागरैः कृतः कषायः शमयेदतीसारं चिरोत्थितं ॥ अरोचकामशूलाजास्रज्वरघ्नः पाचनः स्मृतः ॥ ह्रीवेरादिः

(लज्जालु) (प्रतीस)
पाठा लज्जालु वत्सकैः॥ धान्यकातिविषामुस्ता

शा०ध० (धवफल) धातकीबिल्वलोध्राणि वालकं गजपिप्पलीरभिः कृतं शृतं शीतं पिष्ट्वा मधुः क्षौद्रसंयुतम् प्रदद्यादवलेहं वास
२६ ध्रौतीसारशांतये धान्यकादिः शालपर्णी बलाबिल्वधान्यशुंठीकृतं शृतम् आध्मानशूलसहितां वातजां
(इति वातग्रहण्यां क्वाथः) (प्रतिस)
ग्रहणीं जयेत् शालपर्ण्यादिः गुडूच्यतिविषाशुंठीमुस्तैः क्वाथः कृतो जयेत् आमानुषक्तां ग्रहणीं ग्रा
हीपाचनदीपनः धान्यभद्रकम् यवधान्यपटोलानां क्वाथः सक्षौद्रशर्करः योऽज्यश्चपित्तातिसारेषु बिल्वा-
(इति [illegible] क्वाथ)
म्रास्थिमध्यवत्तपा इंद्रयवादिः त्रिफलादेवदारु[illegible] मुस्तामूषककर्णिका शिग्रुरेतैः कृतः क्वाथः पिप्प
(वायविडंग)
लीचूर्णसंयुतः विडंगचूर्णयुक्तोऽथ कृमिघ्नः कृमिरोगहा त्रिफलादिः फलत्रिकामृतातिक्तानिंबकैः
(करकी) (इति पांडुरोगे)
तवासकैः जयेन्मधुयुक्तः क्वाथः कामलां पांडुतां तथा फलत्रिकादिः पुनर्नवाभयानिम्बदार्वीतिक्ता
पटोलकैः गुडूचीनागरयुक्तैः क्वाथो गोमूत्रसंयुतः पांडुकासोदरश्वासशूलसर्वांगशोथहा पुनर्नवा राम
दिः वासाद्राक्षाभयाः क्वाथः पीतः सक्षौद्रशर्करः निहन्ति रक्तपित्तार्तिश्वासकासान् हास्रगानर २६
(अभया)

गुडूची
रास्नामृता महादारु नागरैरेरण्डसंसृतम्

रक्तपित्तक्षयं कासं श्लेष्मपित्तज्वरं तथा केवलो वासकक्वाथः पीतः क्षौद्रेण नाशयेत् वासाक्षुद्रामृता-
क्वाथः क्षौद्रेण ज्वरकासहा कासघ्नं पिप्पलीचूर्णं युक्तं क्षुद्रारसेन तं पाक्षुद्राकुलत्थवासाभिर्नाग-
रेण च साधितः क्वाथः पौष्करचूर्णाढ्यः श्वासकासौ निवारयेत् रेणुका पिप्पली क्वाथो हिंगुकल्केन
संयुतः पानादेव हि पंचापि हिक्का नाशयति क्षणात् बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः जये-
त्त्रिदोषजां छर्दिं हिंस्यं मिटः पित्तजां तथा हिंगुपौष्करचूर्णाढ्यो रामलश्च तो जयेत् सर्वधातुगते वाते सा-
मे सर्वांगके पिवेत् रास्नापंचकम् रास्नागोक्षुरकैरण्डदेवदारुपुनर्नवाः गुडूच्यारग्वधश्चैव क्वाथमेषां वि-
पाचयेत् शुंठीचूर्णेन संयुक्तं पिबेज्जंघकटीग्रहे पार्श्वपृष्ठोरुपीडायामामवाते सुदुस्तरे रास्नासप्त-
कम् रास्नाहिंगुरणभागास्यादेकभागं ततः परम् धन्वयासवलैरण्डदेवदारुशटीवचाः वासकोनागरं पथ्या
चव्यमुस्तपुनर्नवाः गुडूचीवृद्धदारश्च शतपुष्पा च गोक्षुरः ग्रास्नागंधा प्रतिविषा कृतमालः शतावरी
गृध्रसींकेवलः क्वाथः शेफालीपत्रजस्तथा गृध्रस्यामपचारहृत्

शा० ध०
२७

पिप्पली । पिराबासा
कृष्णासहचरश्चैव धान्यकव्रहतीद्वयं गणः क्वाथं पिबेत्क्वाथं पंचमूलीभिश्चूर्णेन संयुतं कृष्णाचूर्णेन वा योग
राजगुग्गुलुनाथवा अजमोदादिना चापि तैलेनैरंडजेन वा सर्वांगकंपे कुब्जत्वे पक्षाघातेऽववाहुके
गृध्रसीयामामवाते च श्लीपदे चापतानके अंत्रवृद्धौ तथाध्माने जंघाजानुगदे हिते ॥ कामयेमेद्रु
वि. [illegible]की जर
रोगे वंध्यायोन्यामये पुच महारास्नादिराख्यातो ब्रह्मणा गर्भकारणम् महारास्नादिः ॥ एरंडो बीजपूर
पाषाणभेद
श्चगोक्षुरव्रहतीद्वयम् अश्मभेदस्तथा बिल्वरास्नातन्मूलैः क्वाथः स्मृतः एरंडतैलहिंग्वाढ्यो सयव
क्षारसैंधवः शूलानकं च कटीमेढ्रहृद्गुल्मा स्यां व्यपोहयेत् एरंडसप्तकं नागरैरंडयोः क्वाथ ईंडयवस्य
सौवर्चलेन इति वातशूले क्वाथः
वा हिंगुसौवर्चलोपेतो वातशूलनिवारणः त्रिफलारग्वधक्वाथः शर्कराक्षौद्रसंयुतः रक्तपित्त
हरो दाहपित्तशूलनिवारणः एरंडमूलं द्विपलं जलेऽष्टगुणितेपचेत् तत्क्वाथो यावशूकाढ्यः पा राम
इति कफशूले क्वाथ
र्श्वहृत्कफशूलहा दशमूलकृतः क्वाथः सयवक्षारसैंधवः हृद्रोगगुल्मशूलानि कासं श्वासं २७

चनाशयेत् हरीतकीदुरालभाकृतमालकगोक्षुरैः पाषाणभेदसहितैः क्वाथो माक्षिकसंयुतः विबं-
धेमूत्रकृच्छ्रे च सदाहे सरुजे हितः हरीतक्यादिः वीरतरुश्वेतबन्दाकाशः सहचरद्वयम् कुशद्वयन
लोगुन्द्रावसिमन्थकः मूर्वापाषाणभेदश्च श्योनाको गोक्षुरस्तथा अपामार्गश्च कमलं ब्राह्मी चेति गणो
वरः वीरतर्वादिरित्युक्तः शर्कराश्मरिकृच्छ्रहा मूत्रघातं वायुरोगान्नाशयेन्निखिलानपि वीरतर्वा-
दिः एलामधुकगोकण्ठरेणुकैरण्डवासकाः कृष्णाश्मभेदसहिता क्वाथ एषां सुसाधितः शिलाजतुयुतः
पेयः शर्कराश्मरिकृच्छ्रहा एलादिः समूलगोक्षुरः क्वाथः सितामाक्षिकसंयुतः नाशयेन्मूत्रकृच्छ्राणि
तथा चोष्णसमीरणम् वराद्दार्व्यब्दरामरणां क्वाथः क्षौद्रेण मेहहा वत्सकत्रिफलादार्वीमुस्तावीजस्तथा प्रमेहे
फलत्रिकाब्ददार्वीणां विशालायाः शृतं पिवेत् निशाकल्कयुतं सर्वप्रमेहनिवृत्तये फलत्रिकादिः दा-
र्वीरसांजनं मुस्तामथवा तः श्रीफलं त्वचः कैरातश्च पिवेदेषां क्वाथं पणीनं समाक्षिकम् जयेत्सश्रूलं पदरंपी

शा॰ ध॰
२८

त्र्यूषणम् दार्व्यादिः न्यग्रोधश्चप्लक्षकोशाम्रवेतसाबदरीतुणिः मधुयष्टीप्रियालश्च लोध्रद्वयमु
दुंबरः पिप्पलश्च मधूकश्चतथापरिपुणिपिप्पलः शल्लकीतिंदुकं जंबूद्वयमाम्रतरुः शिवा कदंबक
कुभौ चैव भल्लातकफलानि च न्यग्रोधादिगणः क्वाथं यथालाभं च कारयेत् अयं क्वाथो महाग्राही
व्रण्यो भग्नं च साधयेत् योनिदोषहरो दाहमेदोमेहविषापहः न्यग्रोधादिकषायः ॥ बिल्वोऽ
ग्निमंथश्योनाकः काश्मर्यः पाटलातथा क्वाथ एषां जयेन्मेदोदोषं क्षौद्रेण संयुतः क्षौद्रेण त्रिफ
लाक्वाथः पीतो मेदोहरः स्मृतः पीती भक्तमथो ह्यांबु मेदोहृत् क्षौद्रसंयुतम् ॥ व्योषचित्रकविश्वानांसा
धितो देवदारु समान् क्वाथस्त्रिवृच्चूर्णयुक्तो गोमूत्रेणोदरं जयेत् पुनर्नवामृतादारुपथ्यानागरसा
धितः गोमूत्रगुग्गुलुयुतः क्वाथः शोथोदरापहः पथ्यारोहितकक्वाथं यवक्षारकणायुतं पिबे॰ ताम
त्रातमेत्प्लीहगुल्मोदरनिवृत्तये पुनर्नवादारुनिशानिशाशुंठीहरीतकी गडूचीचित्रकोभा॰ २८

देवदारुत्वचैः ध्नन्तः पाणिपादोदरमुखप्राप्तं शोफं निवारयेत् फलत्रिकोद्भवं क्वाथं गोमूत्रेणाथवा पा
चयेत् वातश्लेष्मकृतं हन्ति शोफं च बहुसंभवम् रास्नामृताबलाशुण्ठीगोकंटैरण्डजं शृतं एरंडतैलसंयु
क्तं वृद्धिमामवातजां जयेत् कांचनारत्वचः क्वाथः शुंठीचूर्णेन नाशयेत् गंडमालां तथा क्वाथः क्षौद्रेण
वरुणत्वचः शाखोटवल्कलक्वाथं गोमूत्रेणायुतमपिबेत् श्लीपदानां विनाशाय मेदोदोषनिवृत्त
ये पुनर्नवावरुणयोः क्वाथोऽन्तर्विद्रधिं जयेत् तथा शिग्रुभवः क्वाथो हिंगुसैंधवसंयुतः वरु
णादिगणक्वाथमपक्वे मध्यविद्रधौ ऊषणादिरजोयुक्तं पिबेत् शमनहेतवे सप्तपर्णा वरुणो बकपु
ष्पाश्च बिल्वापामार्गचित्रकाः अग्निमन्थद्वयं शिग्रुद्वयं सैरेयकत्रयं मूर्वामेषशृङ्गी किरातकः
अजाशृङ्गी च शतावरी वरुणादिगणक्वाथः कफमेदोहरः स्मृतः हन्ति गुल्मं शिरःशूलं तथाभ्यंतर
विद्रधिम् वरुणादिः खदिरत्रिफलाक्वाथो महिषीघृतसंयुतः विडंगचूर्णयुक्तश्च भगंदरविनाशनः प
बिल्वी च करञ्जश्च ... ऊषकस्तुत्थकं हिङ्गु कासीसद्वयसैन्धवम् ॥ सशिलाजतु कृच्छ्राश्मगुल्ममेहकफापहम्

शा० ध०
२६

टोलत्रिफलानिंबकिरातखदिरासनैः क्वाथोपीतो जयेत्सर्वाननुपदंशान्सगुग्गुलुः ॥ अमृतैरंडवासा
नां क्वाथमेरंडतैलयुक् पीतः सर्वांगसंचारिवातरक्तं जयेत ध्रुवम् ॥ पटोलत्रिफलातिक्ताकागुडूचीच
शतावरी एतत्क्वाथो जयेत्पीतो वातास्रं दाहसंयुतम् ॥ पटोलादिः क्वाथोऽवल्गुजं पथ्याधात्रीखदिरसा
रयोः जयेत्सुशीलितो नित्यं श्वित्रं पथ्याशिनां नृणाम् ॥ अमृतादिः मञ्जिष्ठात्रिफलातिक्तावचा
दारुनिशाऽमृता निम्बश्चैषां कृतः क्वाथो वातरक्तविनाशनः ॥ पामाकपालिकाकुष्ठरक्तमंडलजिन्म
तः लघुमञ्जिष्ठादिः मञ्जिष्ठामुस्तकुटजगुडूचीकुष्ठनागरैः । भार्ङ्गीक्षुद्रवचानिंबनिशाद्वयफला
त्रिकैः पटोलकटुकामूर्वाविडंगासनचित्रकैः शतावरीत्रायमाणाकृष्णेन्द्रयववासकैः ॥ भृङ्ग
२८ राजमहादारुपाठाखदिरचंदनैः त्रिवृद्वरुणकैरातबाकुचीकृतमालकैः शाखोटकमहानिंबकरं
जातिविषाजलैः इन्द्रवारुणिकाऽनन्तासारिवापर्पटैः समैः एभिः कृतं पिवेत्क्वाथं कणागुग्गुलु २९

संयुतम् ॥ अष्टादशसु कुष्ठेषु वातरक्ते हितं तथा ॥ उपदंशे श्लीपदे च प्रसुप्तौ पक्ष[घाते] घातके मेदोदोषे नेत्ररोगे
मंजिष्ठादिः प्रशस्यते ॥ वृहन्मंजिष्ठादिः ॥ पथ्याक्षधात्रीभू निंबैर्निशानिंबामृतायुतैः ॥ कृतः क्वाथः षडंगो
यं सगुडः शीर्षशूलहा ॥ भ्रूशंखकर्णशूलानि तथा चार्द्धशिरोरुजं ॥ सूर्यावर्तं शंखकं च दंतपातं च
तद्रुजम् ॥ नक्तांध्यं पटलं शुक्रं चक्षुःपीडां व्यपोहति ॥ पथ्यादि ॥ वासाविश्वाऽमृतादार्वीरक्तचंदनचित्र
कैः ॥ भू निंब निंब कटुका पटोल त्रिफलांबुदैः ॥ यवकालिंगकुटजैः क्वाथः सर्वासिरोगहा वैस्वर्ये
पीनसं श्वासं नाशयेदुरसक्षतम् ॥ वासादिः ॥ अमृता त्रिफला क्वाथः पिप्पलीचूर्णसंयुतः ॥ सक्षौद्रः
शीलितो नित्यं सर्वं नेत्रव्यथां जयेत् ॥ अमृतादिः ॥ अश्वत्थोदुम्बरप्लक्षवटवेतसजं श्रृतं ॥ व्रणशो
थोपदंशानां नाशनं क्षालनात्स्मृतम् ॥ इति क्वाथः ॥ अथ प्रमथ्या ॥ प्रमथ्या प्रोच्यते द्रव्यपलात्कल्की
कृता[त्] ... तोयेऽष्टगुणिते तस्याः पानमाहुः पलद्वयम् ॥ [illegible] मुस्तकेंद्रयवैः सिद्धा प्रमथ्या

शा० ध०
३०

द्विपलोन्मिता सुशीता मधुसंयुक्ता रक्तातीसारनाशिनी । अथ यवागू साध्यं चतुःपलं द्रव्यं चतुःष-
ष्टिपले जले । तत्क्वाथेनार्धशिष्टेन यवागूं साधयेद्बुधः । यवागूः षड्गुणे तोये संसिद्धा विरलद्रवा

आमसार
कठाव

साथवा । अथ मांसात कजंबरस्य कषायं विपचेद्बुधः । यवागूं शालिभिर्युक्तां तां च त्वां ग्रहणीं जयेत् । अथ
यूषः कल्कद्रव्यपलं शुण्ठी पिप्पली चार्धकार्षिकी वा विंशत्पलस्येन विपचेत्तद्धूषो यूष उच्यते यूषः कि-
ञ्चिद्घनः पाके मेयात्तः परिकीर्तितः । सयथा कुलत्थस्य यवकोलैश्च मुद्गैर्मूलकशिग्रैः शुण्ठी धान्याक-
युक्तैश्च यूषः श्लेष्मानिलापहः । सप्तमुष्टिक इत्येष सन्निपातज्वराञ्जयेत् । अथाम वातहरः कराहृद्-
क्वाथं विपाच्य तः । सप्तमुष्टिक यूषः । अथ मानादिकल्पनां उशीरं चपेटोदीच्यं मुस्तं नागरचंदनैः ज-
लं शृतं हिमं पेयं पिपासाज्वरनाशनम् । अथ षडङ्गोदक विधिः । अथ षष्टिमेनां पाशोषेण चतुर्थेनार्धकेन वा ।

साम

अथ वा क्वाथनेनैव सिद्ध मुष्ट्वोदकं पिबेत् श्लेष्मामवात मेदोघ्नं बस्तिशोधनरोपणं कासश्वासज्वरान् ३०

शुण्ठीद्रव्यपलं साध्यं चतुःषष्टिपले जले । अर्धशिष्टं च तद्देयं पानेम क्वादि संविधौ १

हन्ति पीतमुष्णोदकं निशि ॥ अथ क्षीरपाकविधिः क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणम् क्षीरा

वशेषं तत्पीतं शूलमामोद्भवं जयेत् ॥ अथ पथ्यान्नप्रक्रिया ॥ अथ पथ्यान्नप्रक्रियोऽत्रैव प्रोच्यते नाति

विस्तरात् यवागूः षड्गुणे तोये सिद्धा स्यात् कृशरा घना तंडुलैर्मुद्गमाषैश्च [illegible] तिलैर्वा साधिता हिता यवा

गूर्ग्राहिणी बल्या तर्पणी वातनाशिनी विलेपी घनसिक्था च सिद्धा नीरे चतुर्गुणे विलेपी तर्प

णी हृद्या मधुरा पित्तनाशिनी इति विलेपी द्रवाधिका स्वल्पसिक्था चतुर्दशगुणे जले सिद्धा पेया

कुपथ्यैर्यायूषः किंचिद्घनस्ततः पेया लघुतरा ज्ञेया ग्राहिणी धातुपु[illegible] ष्टिदा यूषो बल्यस्ततस्ततः कं

ठ्यो लघुः पाके कफापहः इति पेयायूषौ जले चतुर्दशगुणे तंडुलानां चतुःपलं विपचेत्स्रावये

न्मंडं स भक्तो मधुरो लघुः इति भक्तः अथ मण्डः नीरे चतुर्दशगुणे सिद्धो मण्डस्त्वसिक्थकः शुं

ठीसैंधवसंयुक्तः पाचनो दीपनः स्मृतः इति शुद्धमण्डः धान्यत्रिकटुसिंधूत्थयुक्तः तक्रेण यो

60

शा० धे०
३१

जित: सचस्त्वहिंगुतैलाभ्यां समखंडोऽष्टगुणः स्मृतः दीपनः प्राणदो वस्तिशोधनो रक्तवर्द्धनः ज्व
रजित्सर्वदोषघ्नो मखंडोऽष्टगुणोन्मते ह्रस्वष्टगुणमखंडः स्मृकंडितैस्तथा स्मृष्टैर्वाद्यमखंडोपवेर्भवे

प्र

त् कफपित्तहरः कंठ्योरक्तपित्तप्रसादनः इति वाद्यमखंडः लाजैर्वा तंडुलैर्भृष्टैर्लाजमखंडः प्रकीर्तितः

सा

श्लेष्मपित्तहरो रोगनाशो पिपासाज्वरजिन्मतः इति लाजमखंड ॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण
विरचितायां संहितायां चिकित्सास्थाने क्वाथादिकल्पनाध्यायः ॥३॥ अथ फांटकल्पना
क्षुण्णे द्रव्यपले सम्यक् जलमुष्णं विनिक्षिपेत् मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत्पटात् स च स्याच्चूर्ण

मधुकपुष्प ॰ वा

द्रवः फांट तन्मानं द्विपलोन्मितम् क्षौद्रं सिता गुडादींस्तु क्वाथवत्तत्र निःक्षिपेत् स यथा मधूकपुष्प

मोहो मधु फालसा कमलगट्टा खभारी

२ मधूकं चंदनं सपरूषकम् मृणालं कमलं लोध्रं गंभारी नागकेसरं त्रिफलां सारिवां द्राक्षां लाजा कोष्णजे राम
लक्षिपेत् सिता मध्वयुतः पेयः फांटो वासो हिमोपवा वातपित्तज्वरं दाहं तृष्णां मूर्छामतिभ्रमान् ३१

इतिमधुकपुष्पादिफांट। नवीनपत्र।

रक्तपित्तं मदं हन्यान्नात्र कार्या विचारणा ॥ आम्रजंबुकिशलयैर्वटशृंगावरोहकैः उशीरेण कृतः फांटः सक्षौ-

आम्रादिफांट।

द्रोज्वरनाशनः पिपासाछर्घतीसारमूर्छा जयति दुस्तरान् [illegible] फांटः मधूकंपुष्पंगंभा-
रीचंदनोशीरधान्यकैः द्राक्षया च कृतः फांटः शीतः शर्करयायुतः तृष्णापित्तहरः प्रोक्तो दाहमूर्छा-
भ्रमान्जयेत् लघु मधूकपुष्पादिः फांटः ॥ अथ मंथः ॥
अन्योपि फांटभेदःस्यात्तेन चात्रैव कथ्यते सयथा जले चतुःपले शीते क्षुण्णं द्रव्यपलं क्षिपेत ॥ मृत्पात्रे मं-

खजूरफल। अनार। दाख। चिंचिली। आमलवेत। आवला। फालसा

थयेत्सम्यक् तस्माच्च द्विपलं पिबेत् सयथा खर्जूरदाडिमद्राक्षातिंतिडीकाम्लिकामलैः सपरूषैः कृतो
मंथः सर्वमद्यविकारनुत् खर्जूरादिमंथः क्षौद्रयुक्तं मसूराणां सक्तवो दाडिमांभसा मथिता वारयं-
त्याशुछर्दिं दोषत्रयोद्भवाम् मसूरादिमंथः द्राक्षाविंतैः शीतनीरेण सच्छैतैर्यवसक्तुभिः नातिसांद्रद्रवैर्मं-
थस्तस्माद्दाहास्रपित्तहा सक्तुमंथः ॥ ॥ इतिश्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहि-

जेष्टीमधु। कं॰ वरिकानवीनपत्र
जेष्टी चक्रा कोद्रवरिपट्टे वम॥ नीलोत्पलं हि मंपेयं तत्सा छर्दि निवारणम॥ मरिचादि हिमम॥ नीलोत्पलं वटाङ्कुरा सामधू कं मधुकं तथा

तायां चिकित्सास्थाने फांटादिकल्पना: ध्याय॥ ३ अथ हिमकल्पना क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः
निशायां स्थापितेन
प्लुतम् निशोषितो हिमः स स्यात्तथा शीतकषायकः तन्मानं फांटवज्ज्ञेयं सर्वत्रैवैष निश्चयः सयथा आम्र
कोहा
जंबूत्वक ककुभं चूर्णीकृत्य जले क्षिपेत् हिम तस्य पिबेत् प्रातः सक्षौद्रं रक्तपित्तजित् आम्रादि हिमः मरिचं
खस खंभारी फालसा सत्रलोध मरिच छर्दि नीलोत्पलादि हिम
मधुकं लोध्रमुशीरं पद्मकं चैव काश्मरी च परूषकम् एतत्शीतकषायश्च वातपित्तज्वरान् जयेत् अश्मता
वासा हिमः प्रातः सशर्करः रेयोहि मोधान्याकसंभवः अन्तर्दाहं तृष्णा तृष्णां जयेत् स्रोतो विशोधनः
धान्यहिमः धान्याक धात्री वासानां द्राक्षापर्पटयोर्हिमः रक्तपित्तं ज्वरं दाहं तृष्णां शोषं च नाशयेत्
धान्यकादि हिमः॥ इति श्री दामोदरसूनुनाशार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने हिमक
ल्पनाऽध्यायः॥ ४ अथ कल्ककल्पना द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् प्रक्षेपावापकल्को

स्ते तन्मानं कर्षसम्मितम् कल्के मधु घृतं तैलं देयं द्विगुणमात्रया सितां गुडं समं दद्यात् द्रवा देयाश्चतु

याहिमः पटोलजीर्णज्वरहरः॥ भृतं तन्त्र॥ जीर्णज्वरे अश्मतादि हिमः॥ वासायाश्च हिमः
कासरक्तपित्तज्वरान् जयेत् ४

गुणाः समघा त्रिवृच्छाऽपंचवल्काद्यावासनत्वक्छायवाकणाः पिवेत्पिष्ट्वादशाहं तं त्वा च्येवा
पकर्षयेत् एवं विंशाद्दिनं सिद्धं पिप्पलीवर्द्धमानकम् ॥ ७ ॥ तेन पांडुवातास्रकासश्वासारुचिज्व
राः उदरार्शः क्षयशोषवातानश्यंस्तु रोगनहाः वर्द्धमानपिप्पलीकल्कः लेपानि वदलैः
कल्कोद्भवेणशोधनरोपणः भक्षणाच्छर्दिकुष्ठानि विदारणन क्वाथत्रिवृच्चर्णयुतो मोमूत्रे
शोथं जयेत् पुनर्नवा अमृता दारुपथ्यानागरसाधितः मोमूत्रगुग्गुलुयुतः क्वाथः शोथोद
रापहः पथ्यारोहितकक्वाथं यवक्षारकणायुतं पिवेत्स्नाने यकृत्प्लीहगुल्मोदरनिवृत्तये पु
नर्नवा सारुनिशा निशाष्टं हरीतकी गुडूची चित्रको भार्ङ्गी देवदारु च तैः पक्वः पाक्षिका।
देवदारुगुरुत्वचा तं शोथं निवारयेत् फलत्रिकोद्भवं क्वाथं गोमूत्रैर्गोवत्सभक्षयेत् वातश्लेष्मकृतं
हन्ति शोथं च कफसंभवम् ततः भक्ता वल्याय ... भक्षणात् छर्दिकुष्ठानि पित्तश्ले

धा० ध०
२२

(कृमलेपा) (वकाद्विनलक) (गृध्रसीकल्कः) (लसुनस्य)
पाक्रमीञ्जयेत् महानिंबजटाकल्कोगृध्रसीनाशनः स्मृतः अहिः कल्कोरसोनस्य तिलतैलेन।
(विषमज्वरे)
मिश्रितः वातरोगान्जयेत्तीव्रान् विषमज्वरनाशनः पक्वं कंदरसोनस्य गुलिका निस्तुषीकृता
पाटयित्वा च मध्यस्थं दूरीकुर्यात्तदंकुरं तद्गंधनाशाय रात्रौ तक्रे विनिःक्षिपेत् (सौवर्चलं)
पनीयचतन्मध्याच्छिलायां पेषयेत्ततः तन्मध्ये पंचमांसेनच्चूर्णीमेषां विनिःक्षिपेत् सौवर्चलंय
(सोति मरिचपिपरि)
वानीं च भर्जितं हिंगु सैंधवं कटुत्रिकं जीरकं च सममागानि चूर्णयेत् एकीकृत्य ततः सर्वं कल्कं
कर्षप्रमाणतः खादेदग्निबलापेक्षी त्वृतुदोषाद्यपेक्षया अनुमानं ततः कुर्याद्दिरंडश्रुतम
न्वहं सर्वांगैकांगसंवाते महितं चापतंत्रक अपस्मारं तथोन्मादं ममस्तंभं च गृध्रसीम् उरःप
ष्टकटीपार्श्वकुक्षिपीडां कृमीन्जयेत् अजीर्णमातपं रोषमतिनीरं मद्ययोगुडं रसोनमश्नन्पुरुषः
मस्त्रजे रेतन्निरंतरं मद्यं मांसं तथाम्लं च रसं सेवेत नित्यशः इति रसोनकल्कः पिप्पलीपिप्पली

राम
२२

65

मूलं भल्लातकफलानि च एतत्कल्कश्च सक्षौद्रः कुष्ठस्तंभनिवारणः विष्णुक्रांताजटाकल्कः सि
ताक्षौद्रघृतैर्युतः परिणामभवं शूलं नाशयेत्सप्तभिर्दिनैः शुंठीतिलगुडैः कल्को दुग्धेन सह यो
जितः परिणामभवं शूलमामवातं च नाशयेत् अपामार्गस्य बीजानां कल्कस्तंडुलवारिणा पीतो
रक्तार्शसां नाशं कुरुते नात्र संशयः वटीमूलकल्केन तिलकल्कश्च योजितः मधुक्षीरं युक्तः कुष्मो
ड्रकातीसारनाशनं कूष्मांडकरसे पिष्टं लाक्षां कर्षैकं यं पिबेत् रक्तक्षयमुरोघातं क्षयरोगं च नाशयेत्
तेंडूलीमञ्जटा कल्कः सक्षौद्रः सरसांजनः तंडुलोदकसंपीतो रक्तप्रदरनाशनः अंकोलमूलकल्का
श्च सक्षौद्रस्तंडुलांबुना अतीसारहरः प्रोक्तस्तथा विषहरः स्मृतः वंध्याककोटिकामूलं पाटलाटा
जटा तथा घृतेन बिल्वमूलं वाहि विषं नाशयेद्द्विषं अभयासैंधवकणाशुंठीकल्कं त्रिदोषहा पथ्यासैंध
वशुंठीभिः कल्को दीपनपाचनः त्रिवृत्सलाशवीजानि पारसीय यवानिका कंपिल्लकविडंगं च गुडश्च

शा०म० ३६

सप्तमासिकः तक्रेण कल्कमेतेषां पीतः कृमिगणापहः नवनीततिलैः कल्को जेता रक्ताशसां स्मृतः नवनीतसितानागकेसरैश्चापि तद्विधः पीतो मस्तुरसेनाथ कल्को (अपक्वबिल्वफलं) वीशलाऽजः जयेत्सा महणीं हन्ति तक्रेण ग्रहणीभवः ॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने कल्ककल्पनाध्यायः

१२ अथ चूर्णकल्पना अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितं तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसंमिता चूर्णे गुडः समो देयः शर्करा द्विगुणा भवेत् चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत् लिह्याच्चूर्णं द्रवैः सर्वैर्घृताद्यैर्द्विगुणोन्मितैः पिबेच्चतुर्गुणैरेवं चूर्णमालोडितं द्रवैः चूर्णावलेहगुटिकाकल्कानामनुपानकं पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेत् यथा तैलं जले क्षिप्तं क्षणेनैव विसर्पति अनुपानबलादङ्गे तथा सर्पति भेषजं द्रवेण यावता सम्यक् चूर्णं सर्वं प्लुतं भवेत् भावनायाः प्रमाणं तु चूर्णे प्रोक्तं भिषग्वरैः तद्यथा आमलं चित्रकः (वैश्वानरो २३) पथ्या पिप्पली सैन्धवं तथा चूर्णितो यं गणो ज्ञेयः सर्वे

राम ३६

र विनाशनः मेहीरुचिकरः श्लेष्मजेता दीपनपाचनः ॥ आमलक्यादिचूर्णम् मधुना पिप्पलीचूर्णं निहे
त्कासज्वरापहं हिक्काश्वासहरं कंठ्यं प्लीहघ्नं बालकोचितं मधुपिप्पली ॥ एका हरीतकी योज्या द्वौ च
योज्यौ विभीतकौ चत्वार्यामलकान्येवं त्रिफलैषा प्रकीर्तिता त्रिफला मेहशोथघ्नी नाशयेद्विषम

स्म ज्वरान् दीपनी श्लेष्मपित्तघ्नी कुष्ठहंत्री रसायनी सर्पिर्मधुभ्यां संयुक्ता सेवनेत्रामयान् जयेत् इति त्रि
फला ॥ पिप्पली मरिचं शुंठी त्रिभिस्त्र्यूषणमुच्यते दीपनं श्लेष्ममेदोघ्नं कुष्ठपीनसश्लीपदनाशनम् जये
द्रोचकं सामं मेहगुल्मगलामयान् ॥ त्र्यूषणं ॥ पिप्पलीचव्यविश्वाह्वा पिप्पलीमूलचित्रकैः पंचको
लमिति व्याख्यातं रूक्ष्यं पाचनदीपनं आनाहप्लीहगुल्मघ्नं शूलश्लेष्मोदरापहम् ॥ पंचकोलम् ॥ त्रिगंध
मेलात्वक्पत्रैः चातुर्जातं सकेसरैः त्रिगंधं सचतुर्जातं रूक्षोष्णं लघुपित्तकृत् वर्ण्यं रुचिकरं तीक्ष्णं पित्त
श्लेष्मामयान् जयेत् त्रिसुगंधिक चातुर्जातकम् काकोली क्षीरकाकोली जीवकर्षभकौ तथा मेदा महा

महामेदाजीवंतीमधुकंतथा मुद्गपर्णीमाषपर्णीजीवनीयोगणस्त्वयम् जीवनीयोगणः स्वादुर्बृंहः सं
धानकृद्गुरुः स्तन्यकृद्बृंहणो वृष्यस्निग्धः प्रीतिस्तथा महः रक्तपित्तंक्षतं शोषं ज्वरदाहानिलाञ्ज
येत् इतिजीवनीयगणः द्वेमेदे द्वेचकाकोल्यौ जीवकर्षभकौतथा ऋद्धिर्वृद्धीचतैः सर्वैरष्टवर्गउ-
दाहृतः अष्टवर्गोबुधैः प्रोक्तोजीवनीयसमोगुणैः इतिअष्टवर्गः सिंधुसौवर्चलंचैवबिडंसामु- ग
द्रिकंगुडम् एकद्वित्रिचतुःपंचलवणानिक्रमाद्विदुः तेषुमुख्यंसैंधवंस्यादनुक्तेत्रयोजयेत् सैंध
वाद्यैरौमकालंशेषंलवणपंचकं मधुरंस्त्यादि(?) विरमत्रंस्निग्धंतरक्षां(?)वलापहं वीर्योष्णंदीपनंती-
क्ष्णंकफपित्तविवर्द्धनं इतिलवणपंचकम् स्वर्जिकायावशूकश्चक्षारयुग्ममुदाहृतम् तेयोव
न्हिसमौक्षारौस्वर्जिकायावशूकजौ क्षारावन्योपि(?)गुल्माशोग्रहणीरुक्छिदः सराः पाचनाः
कृमिघ्नस्त्वघाः(?) शर्कराश्मरीनाशनाः इतिक्षारौ त्रिफलारजनीयुग्मं कंटकारीयुग्मंशटी त्रिक

यवास
दृग्रंथिकं मञ्जिष्ठा गुडूची धन्वयासकः कटुका पर्पटो मुस्तं त्रायमाणा च वालुकं निंबः पुष्करमूलं
कुरैया सुराष्ट्रदेशोद्भवा मृत्तिका सोरठी माटी ति भाषा।
च मधुयष्टी च वत्सकः यवानींद्रयवो भार्ङ्गी शिग्रुबीजं सुराष्ट्रजा वचा त्वक् पद्मकोशीरं चंदनाति
विषा बला: शालपर्णी पृष्ठिपर्णी विडंगं तगरं तथा चित्रकं देवकाष्ठं च चव्यं पत्रं पटोलजं जीवक
कमलगट्टा
र्षभकौ चैव लवंगं वंशरोचनं पुंडरीकं च काकोली पत्रजं जातिपत्रकं तालीसपत्रं च तथा समभागा
चिरायिता
नि चूर्णयेत् सर्वचूर्णस्य चार्द्धांशं कैरातं प्रक्षिपेत्सुधीः एतत्सुदर्शनं नाम चूर्णं दोषत्रयापहं ज्वरांश्च
निखिलान् हन्यान्नात्र कार्या विचारणा पृथग्द्वंद्वागन्तुजांश्च धातुस्थान्विषमज्वरान् सन्निपातो
द्भवांश्चापि मानसानपि नाशयेत् शीतज्वरैकाहिका[illegible]दीन् मोहं निद्रां भ्रमं तृषाम् श्वासं कासं च पांडु
त्वं हृद्रोगं हंति कामलान् त्रिकपृष्ठकटीजानुपार्श्वशूलं निवारणम् शीतांबुना पिबेद्धीमान् सर्वज्वर
निवृत्तये सुदर्शनं यथा चक्रं दानवानां विनाशनं तद्वज्ज्वराणां सर्वेषामिदं चूर्णं प्रणाशनं इति सुद

चूर्णितामधुनालिह्याद्भेदिनी १ त्रिफलादि॥

शा०ध०
३६

शीतचूर्णं कासश्वासज्वरहरास्त्रिफलापिप्पलीयुता चाग्निबोधिनी कट्फलं (कायफल) मुस्तकं तिक्ता शटी (सुण्ठी)
शृंगी च पौष्करं चूर्णमेषां च मधुनाऽऽर्द्रक (आर्द्रक) रसेन च लिहेज्ज्वरहरं कंठ्यं कासश्वासा: रुचीर्जयेत्
वायुं छर्दिं तथा शूलं क्षयं चैव व्यपोहति कट्फलादिचूर्णम् शृंगी (कर्कटशृंगी) प्रति विषां कृष्णां च चूर्णितां मधुना
लिहेत् शिशु: कासज्वरच्छर्दिशान्त्यै वा केवलां विषां (अतिविषा) शृंग्यादिचूर्णं शुंठी प्रति विषा हिंगु मु
स्ता कुटज चित्रकै: (शुंठ्यादिचूर्णम्) चूर्णमुष्णांबुना पीतमामातीसारनाशनम् हरीतकी प्रति विषा सिंधु सौवर्च
लं वचा हिंगु चेति कृतं चूर्णं पिबेदुष्णेन वारिणा (हरीतक्यादिचूर्णं) आमातीसारशमनं ग्रहि चाग्निप्रबोधकं
मुस्तमिंद्रयवं बिल्वं लोध्रं मोचरसं तथा धातकीं (धवपुष्प) चूर्णयेत्तत्र गुडतक्राभ्यां पाययेत्सुधी: सर्वातीसा
रशमनं निःशेषं प्रवाहिकाम् लघुगंगाधरं नाम चूर्णं संग्राहकं परं लघुगंगाधरचूर्ण
म् मुस्तारलुक (सोनापाठी) शुंठीमिधातकीलोध्रवालकै: बिल्वमोचरसाभ्यां च पाठेंद्रयववत्सकै: आम्र (आम्रगुठिली)

राम
३६

71

बीजं प्रतिविषा लज्जालु रिति च स्मृतैः क्षौद्रं तं उलपानीयपीतैर्योति प्रवाहिका सर्वातीसारग्रहा
णीप्रशमं याति वेगतः वृहद्गंगाधरं चूर्णं स्मरति हैगोपिबंधकम् वृहद्गंगाधरं चूर्णम् तक्रेण
यः पिवेल्लितसं च चूर्णं मरिचसंभवम् चित्रसौवर्चलोपेतं ग्रहणीं तस्य नश्यति उदरं प्लीह मंदाग्निगु
ल्मार्शोनाशनं भवेत् इति मरिचाद्यं चूर्णम् ॥ अष्टौ भागाः कपित्थस्य षड्भागाः शर्करामता दाडि
(बिल्वफलं)
मीतिंतिडीकं च श्रीफलं धातकी तथा ॥ अजमोदा च पिप्पल्यः प्रत्येकं स्युस्त्रिभागिकाः मरिचं जी
रकं धान्यं ग्रंथिकं वालकं तथा सौवर्चलं यवानी च चातुर्जातं सचित्रकं नागरं चैकभागाः स्युः
प्रत्येकं सूक्ष्मचूर्णिताः कपित्थाष्टकसंज्ञं स्याच्चूर्णमेतत्कुलामयान् ॥ अतीसारं क्षयं गुल्म
ग्रहणीं च व्यपोहति कपित्थाष्टकचूर्णम् दाडिमस्य पलान्यष्टौ शर्करायाः पलाष्टकम् पिप्प (ल्य)
(वंशलोचन)
ली पिप्पलीमूलं यवानी मरिचं तथा धान्यकं जीरकं शुंठी प्रत्येकं पलसंमितं कर्षमात्रा तुगा

३७
३७

क्षीरीत्वक्पत्रैलाम्बुकेसरम् प्रत्येकं कोलमात्राः स्युस्तच्चूर्णं दाडिमाष्टकम् अतीसारं क्षयं
गुल्मं ग्रहणीं च गलग्रहम् मंदाग्निं पीनसं कासं च चूर्णमेतद्व्यपोहति वृद्धदाडिमाष्टकम् लव
चिनियाकपूर तज जायफल वंशलोचन
ङ्गं गुडूचकर्पूरं मेलात्वक् नागकेसरं जातीफलमुशीरं च नागरं कृष्णजीरकम् कृष्णागुरुस्तुगाक्षी
रीमांसीनीलोत्पलं कणा। चंदनं तगरं वालकं कोलं चेति च चूर्णयेत् समभागानि सर्वाणि सर्वं
स्योऽर्द्धसिता भवेत् लवङ्गाद्यमिदं चूर्णं राजन्हे वह्निदीपनम् रोचनं तर्पणं वृष्यं [illegible] रोगघ्नं च
बलप्रदं हृद्रोगं कंठरोगं च कासं हिक्कां च पीनसं यक्ष्माणं तमकं श्वासमतीसारमुरःक्षतं प्रमे
हारुचिगुल्मादीन् ग्रहणीमपि नाशयेत् इति लवङ्गाद्यं चूर्णम् जातीफललवङ्गैलापत्रत्वक्
नागकेसरैः कर्पूरचंदनतिलत्वक्क्षीरीतगरामलैः तालीसपिप्पलीपथ्यास्थूलजीरकचि
त्रकैः शुंठीविडंगमरिचैः समभागविचूर्णितैः यावंत्येतानि सर्वाणि कुर्यात् भंगां च ता[illegible]

राम
३७

जुलाब फिरंगरोगक॥ [illegible] हरा बहेरा॥ आंवरा। संठी। मिरिचा। गंधक। पीपर। चीताकी छाल। जमालगोटा मासा छ छ सब चीज दुइ मासा॥
जमालगोटा सब चूरन करि औटै [illegible] ध सेर जल रहै डेढ सेरका नवछान पिवै। तीन रोज मे चंगा होय॥ दस्त लगे॥ मूंग की खिचड़ी खाय॥

73

वतीं सर्वे च चूर्णसमा देया शर्करा च भिषग्वरैः कर्षमात्रं ततः खादेन्मधुना ह्याविलं सुधीः अस्य

श्वासा प्रभावाद्धन्ति हृल्लोकासस्वरविक्षयाः वातश्लेष्मप्रतिश्यायाः प्रशमं यांति वेगतः इति जातीफला

द्यं चूर्णम् मरिचं नागपुष्पाणि तालीसं लवंगानि च प्रत्येकमेकभागाः स्युः पिप्पलीमूल

चित्रकौ त्वक् एला तिंतिडीकं च जीरकं च द्विभागिकाः धान्याम्लवेतसौ विश्वाभया (हरीटी) बदराणि

च अजमोदा जलधरः प्रत्येकं स्युः त्रिभागिकाः सर्वौषधचतुर्थांशं दाडिमस्य फलं भवेत् द्रव्यो

भ्योऽखिलेभ्यश्च सिता देया द्विमात्रया महाखांडवसंज्ञं स्याच्चूर्णमेतत्सुरोचनं अग्निदीप्तिकरं

तीसा हृद्यं कासातिसारनाशनम् हृद्रोगं कंठोदांमुखरोगप्रणाशनम् विषूचिकां तथाध्मानमर्शोगुल्मक

मीनपि छर्दिं पंचविधां श्वासं चूर्णमिदमपोहति इति महाखांडवचूर्णम् चित्रकं त्रिफला (त्रिकटु) व्योषं

जीरकं हपुषा वचा यवानी पिप्पलीमूलं शतपुष्पाजगंधिका (ममरि) अजमोदा शटी (कचूर) धान्यं विडंगं स्य

ग्रा० ध० ३८

जंबीरकम् हेमाव्हापौष्करं मल्लं क्षारौ लवणपंचकं कुष्ठं चेति समांशानि विशालास्याद्द्विभा
गिका त्रिवृद्द्विभागा विज्ञेया दन्ती भागत्रयं भवेत् चतुर्भागा सातला स्यात् स्वर्णमेकत्र चूर्णये
त् पाचनस्नेहनाद्यैश्च स्निग्धकोष्ठस्य रोगिणः इत्याद्ये चूर्णं विरेकाय सर्वरोगप्रणाशनम् हृद्रो
गे पांडुरोगे च कासे श्वासे भगंदरे मंदेऽग्नौ च ज्वरे गुल्मे महत्पं च शूल मेहे इत्याद्युक्तानुपानेन
तत्पाख्याने सुरादिभिः गुल्मे बदरनीरेण विड्बंधे दधिमस्तुना उष्णांबुभिरजीर्णे च वृक्षाम्लैः प
रिकर्तिषु उष्ट्रीक्षीरेणोदरे पूतघातकैरथवा गवाम् गाढ यावातरोगे दाडिमांभो मिश्री सि
द्धि विषे च विषदयात तेन विषनाशनम् चूर्णं नारायणं नाम कुष्ठरोगगणापहं इति नाराय
ण चूर्णम् हपुषा त्रिफला चैव त्रायमाणा च पिप्पली हेमक्षीरी त्रिवृच्चैव सातला कटुका वचा
नीलिनी सैंधवं कृष्णलवणं चेति चूर्णयेत् उष्णोदकेन मूत्रेण दाडिमत्रिफलारसैः तत्पा

राम ३८

75

मांसरसेनापियप्ता भोगंपिवेन्नरः ग्रहणीरोगिणी हृद्गुल्मेषुशोफार्शोविषमाग्निषु हलीम
कामलापांडुकुष्ठाध्मानोदरेष्वपि इतिहपुषाद्यंचूर्णं शुंठीहरीतकीकृष्णात्रिवृत्(निसोत)सौवर्चलंतथा स
मभागानिसर्वाणिसूक्ष्मचूर्णानिकारयेत् नेयंपंचसमंचूर्णमेतत्स्नेहेरपरं ग्राध्मानजठरार्शो
घमामवातहरंसततं इतिपंचसमचूर्णं कर्षमात्राभवेत्कृष्णात्रिवृत्तास्यात्सलोनिता एवंअम्लंच
विज्ञेयंचूर्णमेकत्रकारयेत् कर्षोन्मितंलिहेद्वैतत्क्षौद्रेणाध्माननाशनं गाढविड्कोदरकफान्
पित्तंस्रलानिनाशयेत् इतिनाराचचूर्णम् लवणत्रितयंक्षारौशतपुष्पाह्वयंवचा ग्रजमोदाजगं
धाचहपुषाजीरकद्वयम् मरिचंपिप्पलीमूलंपि प्पलीगजपिप्पली हिंगुश्चहिंगुपत्रीचशटीपाठो
पकुंचिका(मंगरेला) शुंठीचित्रकचव्यानिविडंगंचाम्लवेतसः दाडिमतिंतिडीकंचत्रिवृद्दंतीशतावरी इंद्रवा
रुणीकाभार्ङ्गीदेवदारुयवानिका(धनिया) कुस्तुंबुरुस्तुंबुरूणिपौष्करंबदराणिच शिवाचेतिसमांशानां

शा० चि० ३६

चूर्णमेकत्र कारयेत् भावयेदार्द्रकरसैर्बीजपूररसैस्तथा । पिबेत्सर्पिषा जीर्णे गद्येनोष्णोदकेन वा
कोलांम्लमस्तुना वातश्लेष्मगदापहे नोष्णमस्तुना यकृत्प्लीहकटीशूलगुल्मदग्धप्लीहहृदामयान् ग्रहणीं विबंधमं
दाग्निगुल्माष्ठीलोदराणि च हिक्काध्मानश्वासकासान् जयेदेतान्न संशयः एतैरेवौषधैः सम्यक् घृ
तं वा साधयेत्सुधीः त्रिफलाद्यं चूर्णं तुंबरूण्यत्रिलवणं यवानी पुष्करार्द्धयम् यवक्षाराभयाहिंगुवि
डंगानि समानि च त्रिवृत्त्रिभागा विज्ञेया सूक्ष्मचूर्णानि कारयेत् पिबेदुष्णेन तोयेन यवक्वाथेन वा पिबे
त् जयेत्सर्वाणि शूलानि गुल्मा[illegible]नुदराणि च तुंबुराद्यं चूर्णं चित्रको नागरं हिंगु पिप्पली पिप्पलीज
टा चव्याजमोदमरिचं प्रत्येकं कर्षसंमितं स जिंका च यवक्षारः सिंधुसौवर्चलं विडं सामुद्रकं रोम
कं च कोलमात्राणि कारयेत् एकीकृत्याखिलं चूर्णं भावयेन्मातुलुंगजैः रसैर्दाडिमजैर्वापि शोषयेत्सा
तपेन च एतच्चूर्णं जयेच्छूलं ग्रहणीमाममारुतं ग्रन्थिं च कुरुते दीप्तं रुचिं कफनाशनं चित्राद्यं च

(margin: यवक्वाथ; गजपिप्पली; सर्जीखार; राम ३६)

रामप्रसाद

र्णं सैंधवं पिप्पलीमूलं पिप्पली चव्यचित्रकं म् शुंठीहरीतकी चेति क्रमवृद्धानि चूर्णयेत् वडवानलनामै
तच्चूर्णं स्यादग्निदीपनं वडवानलचूर्णम् अजमोदाविडंगानि सैंधवं देवदारु च चित्रकः पिप्पली
मूलं शतपुष्पा च पिप्पली मरिचं चेति कर्षांशं प्रत्येकं कारयेद्बुधः कर्षास्तु पंच पथ्यायाः दश स्युर्वृ
द्धदारुकात् नागराच्च दशैव स्युः सर्वाण्येकत्र चूर्णयेत् पिबेत्कोष्णजलेनैतच्चूर्णं श्वयथुनाशनं
आमवातरुजं हन्ति सन्धिपीडां च गृध्रसीम् कटिपृष्ठगुदस्थां च जंघयोश्च रुजं जयेत् १०६ तूनीप्र
तूनीविश्वाची कफवातामयान् जयेत् । समेन वा गुडेनास्य वटकान्कारयेत्सुधीः ।१०७। अजमोदा
द्यं चूर्णम् ॥ हिङ्गु पाठाभयाव्योषान्यं दाडिमं चित्रकः सटी ॥ अजमोदा त्रिकटुकं हपुषा चाम्लवेतसः ॥
(जीरकम्)
अजगन्धा तित्तिडीकं पौष्करं वचा ॥ चव्यक्षारद्वयं पञ्चलवणानीति चूर्णयेत् ।१०८। प्राग्भोजनस्य
मध्ये वा चूर्णमेतत्प्रयोजयेत् ११ पिबेद्वाजीर्णमद्येन तक्रेणोष्णोदकेन वा ॥ गुल्मे वातकफोद्भूते हृ

हे प्लीलिकासु च ॥ हृद्बस्तिपार्श्वशूलेषु शूले च गुदयोनिजे ।११। म त्र कुष्ठेऽतृतष्णानाहे पाण्डुरोगे रुचौ

तथा ॥ हिक्कायां यकृति प्लीह्नि श्वासे कासे गलग्रहे ॥ गुल्मार्शोविकारेषु चूर्णमेतत्प्रशस्यते ॥ भा

वितं मातुलुङ्गस्य बहुशः स्वरसेन वा ॥ कुर्याच्च गुटिका ह्येषा वातश्लेष्महरा परा ॥१०३॥ हिंग्वादिचूर्ण

म ॥ यवानी दाडिमं शुण्ठी तिंतिडीकाम्लवेतसौ ॥ बदराम्लं च कुर्वीत चतुः शाणमितानि तु ॥ सार्द्धं द्विशा

णं मरिचं पिप्पली दशशाणिका ॥ त्वक् सौवर्चलं धान्याकं जीरकं द्विद्विशाणकम् ॥ चतुःषष्टिमितैः

शाणैः शर्करा मत्र योजयेत् ॥ चूर्णितं सर्वमेकत्र यवानीखाडवाभिधम् ॥११६॥ चूर्णं जयेत्पाण्डुरो

गं हृद्रोगं ग्रहणीं ज्वरम् ॥ छर्दिः शोषातिसारश्च प्लीहानाहविबन्धनुत् ॥ अरुचिं शूलमन्दाग्निमर्शो

जिह्वागलामयान् ॥११७॥ यवानीखाडवं चूर्णम् ॥ तालीशं मरिचं शुण्ठी पिप्पली वंशरोचना ॥ ए

कद्वित्रिचतुःपञ्चकर्षैर्भागान्क्रमात्क्षिपेत् एलात्वचोस्तु कर्षार्द्धं प्रत्येकं भागमापयेत् ॥११८॥ द्वात्रिंश

त्कर्षेतु लिता स्याद्देया प्राक्केरा बुधैः॥ तालीसाद्यमिदं चूर्णं रोचनं पाचनं स्मृतम्॥ कासश्वासज्वरहरं छ
र्द्यतीसारनाशनम्॥ शोषाध्मानहरं प्लीहग्रहणीपाण्डुरोगजित्॥ १२२॥ पक्त्वा वा शर्करां चूर्णं क्षिपेत्स्या
द्गुटिका ततः॥ तालीसाद्यं चूर्णम्॥ सितोपला षोडशस्यादष्टौ स्याद्वंशरोचना॥ पिप्पली स्याच्चतुः कर्षा स्यादे
ला च द्विकार्षिका॥ एकः कर्षस्त्वचः कार्यश्चूर्णं सर्वं समेकतः॥ सितोपलादिकं चूर्णं मधुसर्पियुतं लिहत्।
१२३ श्वासकासक्षयहरं हस्तपादांगदाहनुत्॥ मन्दाग्निं सुप्तजिह्वं च पार्श्वशूलमरोचकम्॥ ज्वरमू
र्ध्वगतं रक्तपित्तमाशु व्यपोहति॥ १२४॥ सितोपलादिचूर्णम्॥ सामुद्रलवणं कार्यं मष्ट कर्षमिदं बुधैः पञ्च
सौवर्चलं ग्राह्यं विडसैन्धवधान्यकम्॥ पिप्पली पिप्पलीमूलं कृष्णजीरकम्॥ नागकेसरतालीसमम्लवेत
सकं तथा॥ द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः॥ मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम्॥ १२७॥
दाडिमं स्याच्चतुः कर्षं त्वगेले चार्धकार्षिके॥ बीजपूररसेनैव भावितं सप्तवारकम्॥ एतच्चूर्णं कृतं सर्वं लव

ए०प० ८१

दहीकापाणी

र्णं भास्कराभिधम् ॥ एतच्चूर्णं देयं तु मस्तुतक्रसुरासवैः ॥ १२८ ॥ वातश्लेष्मभवं गुल्मं प्लीहानमुद
रं क्षयम् ॥ अर्शांसि ग्रहणीं कुष्ठं विबंधं च भगन्दरम् ॥ शोफं शूलं श्वासकासमाममेहं च हृद्रुजम् ॥ म
न्दाग्निं नाशयत्येतद्दीपनं पाचनं परम् ॥ सर्वलोकहितार्थाय भास्करेणोदितं पुरा ॥ १२९ ॥ भास्करलवणं

बेरकीगिरी धानकालावा

चूर्णम् ॥ एलात्रिकटुमुस्तानि कोलमज्जा च पिप्पली ॥ श्रीचन्दनं तथा लाजा लवङ्गं नागकेसरम् ॥ एतच्चू
र्णं कृतं सर्वं सिता सौद्रयुतं लिहेत् ॥ वातपित्तकफाद्भूतां छर्दिं हन्याति वेगतः ॥ १३३ ॥ एलादिचूर्णम्
॥ मूलं पत्रं फलं पुष्पं त्वचं निम्बात्समाहरेत् ॥ वातपित्तकफाद्भूतां छर्दिं हन्याति वेगतः ॥ स्तत्समचूर्ण

करैलाकाबीज

मिदं कुर्यात्पलैः पञ्चदशोन्मितैः ॥ लोहभस्म हरीतक्यौ चक्रमर्दकचित्रकौ ॥ भल्लातकविडङ्गानि प्र

वकुची

केरामलेकं निशा ॥ पिप्पली मरिचं शुण्ठी वाकुची कृतमालकाः ॥ गोक्षुरश्चपलोन्मानमेकैकं कार

विजयसार

येद्बुधः ॥ सर्वमेकीकृतं चूर्णं भृङ्गराजेन भावयेत् ॥ अष्टभागावशिष्टेन खदिरासनवारिणा ॥ भावयित्वा

राम ८१

81

चसंगृह्य कर्षमात्रं ततः पिबेत् ॥ खदिरासनयत्नो येनेसर्पिषा पयसाः पवा ॥२३८॥ मासेनैव सर्वेकुष्ठानि
विनिहन्ति रसायनम् ॥ पञ्चनिम्बमिदं चूर्णं सर्वरोगप्रणाशनम् ॥२३९॥ पञ्चनिम्बचूर्णम् ॥ शतावरी
केवाचबीज गुलसकेरी ककही तालमखाना
रोगोक्षुरश्च बीजं च कपिकच्छूद्भवम् ॥ गांगेरुकी चातिबला वाजिगन्धेक्षुरकोद्भवम् ॥ चूर्णितं सर्वमेकत्र गोदु
ग्धेन पिबेन्निशि ॥ न तत्स्त्रियाति नारीभिर्नरश्चूर्णप्रभावतः ॥२४१॥ पुष्टिकरं चूर्णम् ॥ अश्वगन्धा दश
पलानि ततो ... वृद्धदारकः ॥ चूर्णं कृत्वा मधुविद्वान् घृतभाण्डे निधापयेत् ॥ कर्षेकं पयसा पीत्वा त्वा
नारीभिर्नैव तृप्यति ॥ अकाले ... पलितवर्जितः ॥२४३॥ अश्वगन्धादिचूर्णम् ॥ चित्र
त्रिकटु मतलोह
कं त्रिफला मुस्तं विडङ्गं त्र्यूषणानि च ॥ समभागानि कार्याणि नव भागा हतायसः ॥ एतदेकीकृतं चूर्णं
मधुसर्पिर्युतं लिहेत् ॥ गोमूत्रमथवा तक्रमनुपाने प्रशस्यते ॥ पाण्डुरोगं जयत्युग्रं हृद्रोगं च भगन्दरम् ॥
शोथकुष्ठोदरार्शांसि मन्दाग्निमरुचिं कृमीन् ॥२४६॥ नवायसं चूर्णम् ॥ अथाकोरकरभः ... शुण्ठीक

82

शा० म०
५२

घं सूंलं कुंकुमं कणा ॥ जातीफलं लवङ्गं च चन्दनं चेति कार्षिकान् ॥ चूर्णितान्मात्रतः कुर्यादहिफेनं प
लोन्मितम् ॥ सर्वमेकीकृतं तस्य माषमेकं मधुना लिहेत् ॥ शुक्रस्तम्भकरं चूर्णं पुंसामानन्दकारकम्
॥ नारीणां प्रीतिजननं सेवयेन्निशि कामुकः ॥२४ ५०॥ करमादि चूर्णम् ॥ इति श्रीदामोदरसूनुना
शार्ङ्गधरेण विरचितायां चिकित्सास्थाने चूर्णकल्पनाध्यायस्त्रयोदशः ॥२३॥ वटकान्यथ क-
ल्प्यन्ते तन्नाम गुटिका वटी ॥ मोदको वटकः पिण्डी गुडवर्तिस्तथोच्यते ॥१॥ लेहवत्साध्यते वह्नौ
गुडो वा शर्करा ऽथवा ॥ गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी ॥ कुर्यादवह्निसिद्धेन क्वचिद्गुग्गु
लुना वटीम् ॥ द्रवेण मधुना वापि गुटिकां कारयेद्बुधः ॥ सिता चतुर्गुणा देया वटीषु द्विगुणो गु
डः ॥ चूर्णात् चूर्णसमः कार्यो गुग्गुलुर्मधु तत्समम् ॥ द्रवं च द्विगुणं देयं मोदकेषु भिषग्वरैः ॥ कर्ष
प्रमाणं तन्मात्रा बले दृष्ट्वा प्रयुज्यते ॥५॥ अथ ॥ इन्द्रवारुणिका मुस्तं शुण्ठी दन्ती हरीतकी ॥ त

राम
५२

तेजवल

वत्सटी विडङ्गानि मोक्षरुद्रिचकस्तथा ॥ तेजोव्हा चह्नि कर्षाणि प्रत्येकं द्व्याणि कारयेत् ॥ स्वरसा

स्वरसेन सप्तवारान्भावयेत्स्वच्छदारुणपात्रे : पलं ॥७॥ चतुःपलं स्याद्द्रवात्तं कोपयेत्सर्वमेकतः ॥ जलद्रो

कार्यद्व्यात्रिगुणितमिति

णे चतुर्थांशं गलितं यावत् काथमुत्तमम् ॥ काथ्यं द्व्यं त्रिगुणितं गुडं सिक्ता पुनः पचेत् ॥ सम्यक्पक्वं

चतं ज्ञात्वा च चूर्णान्येतानि वापयेत् ॥ ८ ॥ चित्रकत्वक्ताद्दन्ती तेजोव्हा पलिकाः पृथक् ॥ पृथक् त्रि

पलिकायां व्योषैलासरिचत्वचः ॥ निक्षिप्य मधुशीते च तस्मिन्त्वस्य प्रमाणकम् ॥ एवं सिद्धो भवेत् ।

श्रीमान् वाकुपन्नागुडः शुभः ॥ जठरं शैं शैलसर्वाणि गुल्मान्वातोदरं तथा ॥ आमवातं प्रतिश्या

यं स्वरहणं चमनं सम् ॥ हलीमकं पाण्डुरोगं प्रमेहं च रसायनम् ॥ १२ ॥ श्रीवाकुणान्लगुरुः ॥ मरिचं

त्रवृद्धुक

कर्षमात्रं स्यात् पिप्पली कर्षसम्मिता ॥ अर्द्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमम् ॥ एतच्चूर्णीकृतं ।

फ़ सम

युंज्यादष्टकर्षगुडेन हि ॥ प्राणप्रमाणां गुटिकां कृत्वा वक्त्रे च धारयेत् ॥ अस्याः प्रभावात्सर्वेऽपि

श्या० षो० ४२

हरीतकी

कासाया न्सेव संशयम॥ १९॥ मरिचादिगुटिका॥ गुडउष्ण एंठो पिप्पलामुस्तैर्धारयेद्गुटिकां मुखे॥
श्वासकासेषु सर्वेषु बिभीतं वापि केवलम्॥ गुडादिगुटिका॥ ग्रामलकं मलं कष्टं लाजाश्च वटरोह
कम्॥ एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे॥ तृष्णां प्रवृद्धां हन्त्येषा मुखशोषं च दारुणम्॥१९॥
सहि॰ पंशोपिप्पीवि॰ घा
ग्रामलादिगुटिका॥ बिडङ्गं नागरं कृष्णा पथ्यामले बिभीतका॥ वचा गुडूचीभल्लातसद्धि पंचा
त्रयोजयेत्॥ एतानि समभागानि गोमूत्रेण विपाचयेत्॥ गुञ्जाभागुटिका पीत्वा चार्द्रकजैरसैः॥ ए
कामजीर्णं मलस्पष्टं विशूच्यां च दापयेत्॥ तिस्रः सर्पदष्टस्य चतस्रः सन्निपातिनः॥ गुटिका जीवनी
नाम्ना संजीवयति मानवम्॥२०॥ संजीवनीगुटिका॥ व्योषाम्लवेतसं चव्यं तालीशं चित्रकं तथा
॥ जीरकं तिन्तिडीकं च प्रत्येकं कर्षभागिकम्॥ त्रिसुगन्धं त्रिशाणं स्यात् ऽगुडः स्यात्कर्षविंशतिः॥ व्यो
षादिगुटिका सेयं पीनसश्वासकासजित्॥ रुचिस्वरकरी ख्याता प्रतिश्यायप्रणाशिनी॥२२॥ व्यो

राम ४३

85

भारिगुटिका॥ ग्रामेषु समगुडां शुण्ठीं त्र्यंशजीरेण गुडपिप्पलीम्॥ कृच्छ्रे जीरगुडं दद्यादर्शः सु चगुडा
भयाम्॥ गुडचतुष्टयगुटिका॥ वृद्धदारकभल्लातशुण्ठीचूर्णेन योजितः मोदकः सगुडो हन्यात्सद्विधा
शेकतां सजम्॥२४॥ वृद्धदारकमोदकः॥ शुष्कसूरणचूर्णस्य भागान् द्वात्रिंशदाहरेत॥ भागान्षो
डश चित्रकस्य शुण्ठ्या भागचतुष्टयम्॥ द्वौ भागौ मरिचस्यापि सर्वाण्येकत्र चूर्णयेत॥ गुडेन पिण्डि
कां कुर्यादर्शसां नाशिनी परा॥२५॥ ग्रशीसिद्धसूरणगुटिका॥ सूरणो वृद्धदारस्य भागौ षोडश
।भिः पृथक्शुण्ठी चित्रकौ तेयावष्ट भागमितौ पृथक्॥ शिवाविभीतकौ धात्री विडङ्गं नागरं कणा॥
भल्लातपिप्पलीमूलं तालीशं च पृथक्पृथक्॥ चतुर्भागप्रमाणेन त्वगेलामरिचं तथा॥ द्विभागमात्रा
णि पृथक्ततस्त्वेकत्र चूर्णयेत॥ द्विगुणेन गुडेनाथ वटकान्कारयेद्बुधः॥ प्रबलाग्निकराः एते तथा
र्शोनाशनाः परा॥ ग्रहणी वातकफजाश्वासकासास्तथापहाः॥ प्लीहानं श्लीपदं शोथं हिक्कां मेहं भग

शा० प्र० ४४

न्तरम॥ निहन्ति पलितं वै व्याधीस्तथान्याः रसायना:॥३९॥ हरण्यादिगुटिका:॥ त्रिफलां त्र्यूषणं चव्यं पिप्पलीमूलचित्रकौ॥ दारुमाक्षिकधातुत्वक् दार्वीमुस्तं विडङ्गकम्॥ प्रत्येकं कर्षमात्राणि सर्वेष्वेभिः गुडि समं सर्वं गुडिकाः कृत्वा तता॥ मण्डूरं चूर्णयेत्सर्वं गोमूत्रेऽष्टगुणे क्षिपेत्॥ पक्त्वा च वटकान् कृत्वा रघाता क्राद्यनु पानतः॥ कामलापाण्डुमेहार्शः शोथकुष्ठकफामयान्॥ ऊरुस्तम्भमजीर्णं च प्लीहानं नाशयन्ति च॥३४॥ मण्डूरवटकाः॥ कर्पूर चन्द्रप्रभा वचामुस्तं भूनिम्बामरदारवः॥ हरिद्रातिविषा दार्वी पिप्पलीमूलचित्रकाः॥ धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली॥ व्योषं माक्षिकधातुश्च द्वौ क्षारौ लवणत्रयम्॥ एतानि शाणमात्राणि प्रत्येकं कारयेद्बुधः॥ निसोत। तेजपा। त्रिवृद्दन्तीपत्रकं च त्वगेला वंशरोचना॥ प्रत्येकं कर्षमात्राणि कुर्यादेतानि बुद्धिमान्॥ चन्द्रप्रभेति विख्याता सर्वरोगप्रणाशिनी॥ प्रमेहान् विंशतिं कृच्छ्रं मूत्राघातं तथाश्मरीम्॥ विबन्धानाहशूलानि मेहनं ग्रन्थिमर्बुदम्॥ अण्डवृद्धिं तथा पाण्डुं कामलां च हलीमकम्॥ ४४

द्विकर्षं हतलोहं स्याच्चतुःकर्षा सिता भवेत्॥ शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः॥ एभिरेकत्र संक्षुण्णैः कर्तव्या गुटिका शुभा॥

राम

ग्नं पाण्डुत्वं वह्निमान्द्यं च शूलं कासं श्वासं विचर्चिकाम्॥ कुष्ठान्यर्शांसि कण्डूं च प्लीहोदरभगन्दरम्॥ दन्तरोगं नेत्ररोगं
स्त्रीणामार्तवजां रुजम्॥ पुंसां शुक्रगतान्दोषान्मन्दाग्निमरुचिं तथा॥ वायुं पित्तं कफं हन्याद्बल्या वृष्या र
सायनी॥ चन्द्रप्रभाख्या: कर्षहस्ता चतु:शाणेन विधीयते॥ चन्द्रप्रभादिगुटिका॥ यवानीजीरकं धान्यं
मरिचं गिरिकर्णिका॥ अजमोदोपकुञ्ची च चतु:शाणं पृथक् पृथक्॥ ४५॥ हिङ्गु षट्शाणिकं कार्यं
क्षारौ लवणपञ्चकम्॥ त्रिवृच्चाष्टमितै: शाणै: प्रत्येकं कल्पयेत्सुधी:॥ दन्तीशटीपौष्करं च विडङ्गं दा
डिमं शिवा॥ चित्रकोऽम्लवेतस: शुण्ठी शाणै: षोडशभि: पृथक्॥ बीजपूररसेनैषां गुटिकां कारयेद्बु
ध:॥ घृतेन पयसा मद्यैरारनालैरुष्णोदकेन वा॥ पिबेत्काङ्कायनप्रोक्तां गुटिकां गुल्मनाशिनीम्॥ मद्येन
वातिकं गुल्मं गोक्षीरेण च पैत्तिकम्॥ मूत्रेण कफगुल्मं च दशमूलैस्त्रिदोषजम्॥ उष्ट्रीदुग्धेन नारीणां र
क्तगुल्मं निवारयेत्॥ हृद्रोगं ग्रहणीं शूलं कृमीनर्शांसि नाशयेत्॥ ५०॥ काङ्कायनगुटिका॥ नाग

शा०प०
५५

रं पिप्पली च व्यापिप्पलीमूलचित्रकैः ॥ भृष्टहिंगुवजमोदाच सर्षपो जीरकद्वयम् ॥ रेणुकेन्द्रयवा
पाठाविडंगगजपिप्पली ॥ कटुकातिविषाभार्गी वचामूर्वैति भागतः ॥ प्रत्येकं शाणिकानि स्युः द्र
व्याणीमानि विंशतिः ॥ द्रव्येभ्यः सकलेभ्यश्च त्रिफला द्विगुणा भवेत् ॥ एभिश्चूर्णीकृतैः सर्वैः स
मो देयश्च गुग्गुलुः ॥ प्रजात्वीरेऽथ वाग्न्येपाचयेच्च भिषग्वरः ॥ एकपिण्डं ततः कृत्वा धारये
त् घृतभाजने ॥ गुटिकाः शाणमात्रास्तु कृत्वा ग्राह्या यथोचिताः ५५ ॥ गुग्गुलुर्योगराजोऽयं
त्रिदोषघ्नो रसायनः ॥ मैथुनाहारपानानां त्यागो नैवात्र विद्यते ॥ सर्वान्वातामयान्कुष्ठमर्शांसि ग्र
हणीगदम् ॥ प्रमेहं वातरक्तं च नाभिशूलं भगंदरम् ॥ उदावर्तं क्षयं गुल्ममपस्मारमुरोग्रहम् ॥
मन्दाग्निं श्वासकासं च नाशयेदरुचिं तथा ॥ रेतोदोषहरः पुंसां रजोदोषहरः स्त्रियाः ॥ पुंसामप   राम
पत्यजनको वन्ध्यानां गर्भदस्तथा ॥ ५६ ॥ रास्नादिक्वाथसंयुक्तो विविधं हन्ति मारुतम् ॥ काको । ५५

८९

स्यादिस्तत्तासिक्तं कफं मारवचादिना॥ दार्वीसत्त्वेन मेहांश्च गोमूत्रेणैव पाण्डुतां॥ मेदोवृद्धिं च
। मधुना कुष्ठं निम्बसत्त्वेन च॥ छिन्नाक्काथेन वातास्त्रं शोथं मूलकजात्स्वतात्॥ पाटल्याक्काथसहि
तो विषं मूषजं हरेत्॥ त्रिफलाक्काथसहितो नेत्रार्तिं हन्ति दारुणाम्॥ पुनर्नवादेः क्काथेन हन्यात्स
र्वोदराण्यपि॥ ६३॥ योगराजगुग्गुलुः॥ त्रिफलायास्त्रयः प्रस्थाः प्रस्थैकममृता भवेत्॥ संक्षुद्य
लोहपात्रेण सार्द्धे द्रोणाम्बुना पचेत्॥ जलमर्द्धशृतं ज्ञात्वा गृह्णीयाद्वस्त्रगालितम्॥ ततः क्काथे क्षिपे
च्छुद्धं गुग्गुलुं प्रस्थसम्मितम्॥ पुनः पचेदयःपात्रे दर्व्या संघट्टयेन्मुहुः॥ सान्द्रीभूतं तं ज्ञात्वा गुडपाकस चेतं
माकृतिः॥ ~~दन्तीकर्षमिता कार्या त्वक्कर्षमिता [illegible]॥ ततः [illegible] पात्रे विनिक्षिपेत्~~॥
~~[illegible]~~ चूर्णीकृत्य ततस्तत्र द्रव्याणीमानि निक्षिपेत्॥ त्रिफला द्विपला ज्ञेया गुडूची
पलिका मता॥ ६७॥ षडूसंज्ञं चूर्णं प्रोक्तं विडङ्गानां पलार्द्धकम्॥ दन्तीकर्षमिता कार्या त्वक्क्षीरि

शा०म०
८६

तास्मता॥ ततः पिण्डीकृतं सर्वं घृतपात्रे विनिक्षिपेत्॥ गुटिकां शाणिकां कृत्वा युञ्ज्याद्दोषाद्यपेक्षया
मा॥ अनुपाने भिषक् युञ्ज्यात्कोष्णनीरं पयोऽथवा॥ मञ्जिष्ठादिशृतं वापि विविधिपुनरुदाहृतम्॥ जयेत्स
र्वाणि कुष्ठानि वातरक्तं त्रिदोषजम्॥ सर्वव्रणानि गुल्मांश्च प्रमेहपिडकास्तथा॥ प्रमेहोदरमन्दाग्निका
सश्वयथुपाण्डुताम्॥ हन्ति सर्वामयान्नित्यमुपयुक्तो रसायनः। कैशोरिकाभिधानोऽयं गुग्गुलुः का
न्तिकारकः॥ ७२॥ वाह्लादिना नेत्रगदान्गुल्मादीन्वरुणादिना॥ क्वाथेन खदिरस्यापि व्रणानि कु
ष्ठानि नाशयेत्॥ अम्लं तीक्ष्णमजीर्णं च व्यवायं श्रममातपम्॥ मद्यं रोषं त्यजेत्सम्यक् गुणार्थी पुरसे
वकः॥ ७४॥ कैशोरकगुग्गुलुः॥ त्रिपलं त्रिफलाचूर्णं पलोन्मितम्॥ गुग्गुलुः पञ्चपलिकः क्षोद
येत्सर्वमेकतः॥ ततस्तु गुटिकां कृत्वा प्रयुञ्ज्याद्वह्न्यपेक्षया॥ भगन्दरं गुल्मशोफावर्शांसि च वि
नाशयेत्॥ त्रिफलागुग्गुलुः॥ अहविंशतिसंख्यानि पलान्यानीय गोक्षुरोः॥ विपचेत्षड्गुणे नीरे

राम
८६

गुग्गलु

रेखा प्यागना च्छोहिशेषितः ॥ ततः पुनः पचेत्तत्र पुरं सप्त पलं क्षिपेत ॥ गुडपाकसमाकारं ज्ञात्वा तं तत्र
निक्षिपेत् ॥ त्रिकटुत्रिफलामुस्तं चूर्णितं पलसप्तकम् ॥ ततः पिण्डीकृतस्यास्य गुटिकामुपयो-
जयेत् ॥ हन्यात्प्रमेहं कृच्छ्रं प्रदरं मूत्रघातकम् ॥ वातास्रं वातरोगांश्च शुक्रदोषं तथाश्मरीम्
॥ ८० गोक्षुरादिगुग्गुलुः त्रिफलाऽष्टैलाकार्या माक्षिकातानां चतुष्पलम् ॥ वाकुचीपञ्चपलिका विड-
ङ्गानां चतुःपलम् ॥ हतं लोहं तु वङ्गं चैव गुग्गलुश्च शिलाजतु ॥ एकैकं पलमात्रं स्यात्पला ह्येषोष्टकं भवेत्
॥ चित्रकश्च पलार्द्धं स्यात् हिङ्गुलं मरिचं भवेत् ॥ नागरं पिप्पलीमुस्तं त्वगेलापत्रकुङ्कुमम् ॥ शाल्मलिनिर्मितं स्या-
देकैकं चूर्णयेत्सर्वमेकतः ॥ ततस्तत्र क्षिपेच्चूर्णं पक्वखण्डं चतत्समे ॥ मोदकान्गुलिकान्कृत्वा प्रयु-
ञ्जीत पथ्याचितम् ॥ हन्ति सर्वाणि कुष्ठानि त्रिदोषप्रभवामयान् ॥ भगन्दरं प्लीहगुल्मान जिह्वातालुगला-
मयान् ॥ शिरोक्षिभ्रूगता रोगानन्यान् पृष्ठगतानपि ॥ प्राग्भोजनस्य देयेऽस्याऽधःकायगते गदे ॥ मेषजं

रा०प० भक्तमध्ये च रोगे जठरसंस्थिते ॥ भोजनस्योपरि ग्राह्यम् ऊर्ध्वजत्रुगदेषु च ॥ ८१ ॥ त्रिफलामोदकः ॥ का

४१ (कचनार) श्चनारत्वचो ग्राह्यं पलविंशतिकं बुधैः ॥ त्रिकटु द्वादशपलं त्रिफलाषट्पलं भवेत् ॥ पलैकं वरुणं का

थमेलात्वक्पत्रकं तथा ॥ एकैकं कर्षमात्रं स्यात्सर्वाण्येकत्र चूर्णयेत् ॥ यावच्चूर्णमिदं सर्वं तावन्ना

चत्स्क गुग्गुलुः ॥ संकुट्य सर्वमेकत्र पिण्डं कृत्वा च धारयेत् ॥ गुटिकाः शाणिकाः कृत्वा प्रातर्नीह्याम्भसा पो

चितौ ॥ गण्डमालां जयेद् ग्रन्थीनपचीमर्बुदानपि ॥ व्रणान्नाडीव्रणान्निर्मूलांश्च कुष्ठानि च भगन्दरम् ॥ प्र

देयश्चानुपानार्थं क्वाथो मुण्डितिकाभवः ॥ क्वाथं खदिरसारस्य पथ्याक्वाथोऽथवोष्णोदकम् ॥ ९३ ॥

काञ्चनारगुग्गुलुः ॥ (उरद) निस्तुषं माषचूर्णं स्यात्तथा गोधूमसंभवम् ॥ निस्तुषं यवचूर्णं च शालित

(तालमखाना) (विदारी पाताल कुहडा) (वानरी कवांचबीज ॥ दुर्वा)

ण्डुलजं तथा ॥ पत्रं त्वचा लवङ्गं च मुसली कोकिलाक्षकः ॥ विदारी वानरीबीजं गोक्षुरी गोस्तनामयाः ॥ स राम

मं च त्रिफलं चैव यष्टिः त्रिकटुकं तथा ॥ सर्वाश्च पिप्पलीचूर्णं पलिकान् परिकल्पयेत् ॥ ततः शर्करा ४१

तं सर्वं मर्जयेद्बुद्धोयच्चतेन च ॥ ग्रहे मात्रेण सर्वेभ्यस्ततः स्वांडे समं लिपेत ॥ जलं च द्विगुणं दत्त्वा पाचयेत्तां
तशनैः शनैः ॥ ततः पंक्वं समुद्धृत्य कृत्वान्कुर्वीत मोदकान ॥ भुक्त्वा सायं पलैकं च पिबेत क्षीरं चतुर्गुणम
॥ वर्ज्जनीयो विशेषेण स्नानाम्लोहैरसावपि ॥ क्लैब्यं रमयेन्नारीवृद्धोपीयतेनरः ॥१॥ माषादिमोदकः
इति श्रीदामोदरसूनुनाशार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने वटककल्पनाध्यायश्च
तुर्दशः ॥१४॥ क्वाथादेर्यत्पुनः पाकात घनत्वं सा रसक्रिया ॥ सोऽवलेहश्च लेहस्तन्मात्रा स्यात्पलोन्मि
ता ॥ सिता चतुर्गुणा कार्या चूर्णाच्च द्विगुणो गुडः ॥ द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्चयः ॥२॥ सुपक्वे तं
तुमत्वं स्याद्वलेहोऽप्सु मज्जनम ॥ स्थिरत्वं पीडिते मुद्रा गन्धवर्णरसोद्भवः ॥ दुग्धमिक्षुरसं यूषं पंचमूल
कषायकम ॥३॥ तुषेद वासाक्वाथं यथायोग्यमनुपानं प्रदृश्यते ॥४॥ सयष्ठा ॥ कांर्तनुलांनीरद्वोरे कारी
पत्कावकषायकम ॥ पादशेषं [illegible] कषायकम ॥ [illegible] गृहीत्वा चतसृभिर्न चूर्णनिरापयेत ॥

यवासा

शा० म०
८

मुस्तकं कट्फलं शृङ्गी चक्रमर्द्दश्च धन्वयासकः ॥६॥ मा
षपकपलांशान्येतानि गुडूची च व्याघ्रचित्रका: ॥ प्रसेकं च पलान्यष्टौ प्रदद्यात् घृततैलयोः ॥ पक्वावलेहे
गोरसान् सटी चैव शर्करापल विंशतिः ॥ प्रसेकं च पलान्यष्टौ प्रदद्यात् घृततैलयोः ॥ पक्वावलेहे
श्वमानीय शीतिभय य पलाष्टकम् ॥ चतुष्पलं त्वगाक्षीर्या: पिप्पलीनां चतुष्पलम् ॥ त्रिस्वानि
श्वमानीय शीतिभय य पलाष्टकम् ॥ चतुष्पलं त्वगाक्षीर्याः पिप्पलीनां चतुष्पलम् ॥ लिप्त्वानि
द्व्याल्ल्हु देहम् नाये भाजने स्तूमे ॥ लेहोयं हन्ति हिक्कां तिकासश्वासानतो चकम ॥८॥ कराट
कार्यो ग्रवलेह ॥ पाठला रलिकाश्मर्यो विल्वारलुक गोक्षुराः ॥ पर्णौ बृहत्यौ पिप्पल्यः
डोडी
ष्टकाद्ग्रसाः मताः भया ॥ बलाभ प्यासमलोवासा क्रौष्ठी जीवन्तिका सटी ॥ जीवकर्षभकौमु
पातालकुंहडा
कोलाडोडी
स्तं पौष्करकाकनाशिका ॥२१॥ मुद्गपर्णी माषपर्णी विदारी च पुनर्नवा ॥ काकोली कमलं मे
दामस्तो लागुरु चन्दनम् ॥ एकैकपलसंमानं स्थूलं च लिन्न मोचयेत् ॥ एकीकृत्य महसात्रेण
श्वाः मल शतानि च ॥ पञ्चेह्योगतं लेलि पात्वा तावन्म माढ़ावशेषितम् ॥ ततस्तत्र न्यामलानि ति

दाम
८८

95

ष्कुलीकृत्य वाससा ॥ [illegible] तानि २८ हस्तेन संमर्द्य स्थित्वा तत्र ततो घृ
तम् ॥ पलसप्तमितं तानि किंचिद्भृष्टा ३ स्यवह्निना ॥ ततस्तत्राक्षिपेत् काप्यं खण्डं चार्द्धतुलोन्मितम्
॥ लेहवत्साध्य पिहाच चूर्णानीमानि दापयेत् ॥१७॥ पिप्पली द्विपला देया तुगाक्षीरी चतुष्पला ।
। प्रत्येकं च त्रिशाणाः स्युस्त्वगेलापत्रकेसराः ॥ ततस्त्वेकीकृते तस्मिन् क्षिपेत् क्षौद्रं च षट्पलम् ॥
इत्येवं च्यवनप्रोक्तं च्यवनप्राशसंज्ञितम् ॥१९॥ लेहं वह्निबलं दृष्ट्वा खादेत्क्षीरोरसायनम् ॥ वा
लवृद्धाः क्षतक्षीणा नारी क्षीणाश्च शोषिणः ॥ हृद्रोगिणः स्वरक्षीणा ये नरास्तेषु पूज्यते ॥ कासं
श्वासं पिपासां च वातास्रमुरसो ग्रहम् ॥ [illegible] स्थिताः वातं पि
त्तं [illegible] शुक्रदोषं मूत्रदोषं च नाशयेत् ॥ मेधा स्मृति स्त्री प्रहर्षं कान्तिं वर्णं प्रसन्नताम् ॥ अस्य प्रयो
गात्प्राप्नोति नरो जीर्णविवर्जितम् ॥२३॥ च्यवनप्राशावलेहः ॥ निष्कुलीकृतसत्कूष्माण्डखण्डा

ग्र०प०
४६

त्पलशतं पचेत ॥ निःक्षिप्य हिततुलं नीरमर्द्धशिष्टं च गृह्यते ॥ तानि कूष्माण्डखण्डानि पीडयेद्दृढवा
ससा ॥ ॰आतपे शोषयेत्किंचित्पश्चात्ताम्रे वेकुशो व्यपचेत ॥ सिद्धा तत्ताम्रकटाहे च रस्यार घृतप्लं प्च
तम ॥ तेन किंचिद्भर्जयित्वा रवौ तां तज्जलं क्षिपेत ॥ खंडान्पलशतं दत्वा सर्वे सम्यक पाचयेत ॥ सुप
क्वे पिप्पलीशुण्ठीजीरकाणां द्विपलं पृथक ॥ पत्रक पलार्द्धं धान्याकं पत्रैलामरिचं त्वचः ॥ चूर्णी

सि

कृत्य पतत्रयं तां द्वे सौद्रमाक्षिपेत ॥ स्वादेदग्निबलं दृष्ट्वा रक्तपित्तीज्वरी सपी ॥ शोषतृष्णातमका
छर्दिकासश्वासक्षतातुराः ॥ कूष्माण्डकावलेहोयं बालवृद्धेषु युज्यते ॥ उरःसन्धानकृद्ह ।
ष्यो वृंहणो बलकृन्मतः ॥ ३० ॥ कूष्माण्डकावलेहः ॥ युक्त्या कूष्माण्डखण्डस्य स्वरसं वि
पचेत्सुधीः ॥ ॰अग्निसाम्यं दवात्ता तं गनैर्मन्दाग्नौ तां च युज्यते ॥ ३१ ॥ स्वरसावलेहः ॥ हरीतकीशतं म
द्रूयवानामाढकं तथा ॥ पलानि दशमूलस्य विंशतिनु नियोजयेत ॥ चित्रकः पिप्पलीमूलमपामा

राय
४६

गि: सटीतप्या ॥ कपिकच्छु: शंखपुष्पी भार्गी च गजपिप्पली ॥ बलापुष्करमूलं च पथ्यापाद्विपलमा
त्रया ॥ शोषघ्न आमातकाछर्दिकासश्वासहतातुरा: ॥ पचेत्स्वाथके नीरे यवै: स्विन्नै: स तंन
येत् ॥ तत्राभयाशतं दद्यात् क्वाथे तस्मिन्विचक्षण: ॥ सर्पिस्तैलाष्टपलिकं क्षिपेत्कुडवतुलांतप्या ॥
पत्का लेहत्वमानीय सिद्धं शीतं पथ्यकपणक ॥ सौद्रं च पिप्पलीचूर्णं दद्यात्कुडवमात्रया ॥ हरी
तकीद्वयं खादेत्तेन लेहेन नित्यश: ॥ क्षयं श्वासज्वरं कासं हिक्काशोषारुचिपीनसान् ॥ ग्रहणीना
शयसेषवलीपलितनाशन: ॥ बलवर्णकर: पुंसामवलेहो रसायन: ॥ विहितोऽगस्त्यमुनिना
सर्वरोगप्रणाशन: ॥ ३८ ॥ ॥ अगस्त्यहरीतक्यवलेह: ॥ कुटजत्वक्तुलां द्रोणे जलस्य विपचे
त्सुधी: ॥ कषायं पादशेषं च गृहीत्वा वस्त्रगालितम् ॥ त्रिंशत्पलं गुडस्यात्र दत्वा च विपचेत्पु
न: ॥ सान्द्रत्वमागतं दृष्ट्वा चूर्णानीमानि दापयेत् ॥ रसांजनं (रसवत) मोचरसं त्रिकटुत्रिफलांतप्या ॥

शा० धं०
५०

नं मलविष्टंभ मुद्रावर्त्तं च नाशयेत् अथइच्छाभेदीरसः दरद टंकणं शुंठी पिप्पली चैव कार्षिका
९७ हेमाह्वा पलमात्री स्याद्दंती वीजं च तत्समं विचूर्णितं कत्रसवीरो गोद्रव्ये नैव साधयेत् ९८ त्रि
गुंजं रेचनं दद्याद्विष्टं भाध्मानरोगिषु अथराजमृगांकोरसः भस्मसूतास्त्रयो भागाः भागैकं हेमभ राम
स्मकं ९९ मृततान्त्रस्य भागैकं शिलागंधकतालकं प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत १०० ७१

छायायामेषु नं २४ मद्यं सधान्यकं हिंगुशुंठी माषान्मसूरकान् कूष्मांडं शाजिकां कोषं कांजिकं चैव व
र्जयेत् २५ त्यजेद्दधुक्तानिद्रां च कांस्यपात्रे भोजनं ककारादियुतं सर्वं सजेच्छाकफलादिकं २६ मा
द्यायं लोकनाथस्तु शुभनक्षत्रवासरे पूर्णतिथौ शुक्लपक्षे जाते चंद्रबले तथा २७ पूजयित्वा लो
कनाथं कुमारीं भोजयेत्ततः दानं दत्वा हि घटिकामध्ये गदाद्धोरसोत्तमः २८ रसाच्च जायते तापस्तत्र
शर्करया युतं सलवंगुडूच्या गृहीयाद्वृशलोचनयायुतं २९ खर्जूरं दाडिमं द्राक्षा तामिस्त्रं खंडानि
दापयेत् अस्त्रौ निस्तुषं धान्यं घृतं मर्द्दं सशर्करं ३० दद्यात्तथा ज्वरे धान्यगुडूचीक्काथमाहरेत्
उशीरवासककाथं दद्यात्समधुशर्करं ३१ रक्तपित्ते कफे श्वासे च स्वरसं स्वयं अग्निमहृत्या च
र्णं मधुनानिशि दीयते ३२ निद्रानाशे तिसारे च ग्रहण्यां मंदपावके सौवर्चलाभया कृष्णाचूर्णम्
ष्णजलैः पिबेत् ३३ शूले जीर्णे तथा कृष्णा मधुयुक्ता ज्वरे हिता प्लीहोदरे वातरक्ते छर्द्यां चैव गुडाकरे

रा०च० ३४ नासिकास्रुतरक्ते च रसं दाडिमपुष्पजं दूर्वाया: स्वरसं नस्ये प्रदद्यात् छर्दि रोधयेत् ३५ कोलमज्जा
७४ कणां बर्हिपक्षभस्म सशर्करं मधुनालेहयेत् छर्दि हिक्काकोपस्य शांतये ३६ विविधैश्च प्रयोगैस्तु
सर्वैस्मिन पोटलीरसे मृगांके हेमगर्भे च मौक्तिकाख्ये परेषु च ३७ इत्यं लोकनाथोक्तो रस: सर्व
त्र योजयेत् अथ मृगांकपोटलीरस: सूक्ष्मवर्तनुपत्राणि हेम्न: सूक्ष्माणि कारयेत् ३८ तुल्यानि
तानि सूतेन खल्वे क्षिप्त्वा विमर्दयेत् कांचनारस्य रसेनैव ज्वालामुख्या रसेन च ३९ लांगल्या वा रसेनैव
यावद्द्रवति पिष्टिका ततो हेम्नश्चतुर्थांशं टंकणं तत्र निक्षिपेत् ४० पिष्टमौक्तिकचूर्णं च हेमद्विगु
णं भवेत् तेषु सर्वेषु समं गंधं क्षिप्त्वा चैकत्र मर्दयेत् ४१ एकीकृत्य ततो गोलं वाससा च परिवेष्टयेत् प
श्चान्मृदा वेष्टयित्वा शोषयित्वा च धारयेत् ४२ शरावसंपुटस्यांतस्तत्र मुद्रां प्रदापयेत् लवणपूरि राम
ते भांडे धारयेत्तच्च संपुटं ४३ मुद्रां दत्वा शोषयित्वा वह्निभिर्गोमयै: पुटेत् तत: शीते समाकृष्य गंधं ७४

सूतसमं क्षिपेत् ४४ घट्टयेच्च पूर्ववच्च तत् वस्त्रे पुटे कुक्कुटपुटेन च स्वांगशीतं ततो नीत्वा गुंजायुग्मं प्रयोज-
येत् ४५ अष्टभिर्मरिचैर्युक्ता कृष्णात्रययुताथवा विलोक्य देयाद्दोषादीनथैकारसरक्तिका
४६ सर्पिषा मधुना चापि दद्याद्दोषाद्यपेक्षया लोकनाथसमं पथ्यं कुर्यात्तस्य मतेः सुखी ४७ श्ली-
पाण्डुग्रहणीं कासश्वासं क्षयमरोचकं मृगांकोयमिचकुरुते कफवातं नियच्छति ४८ रसोहिन्या-
त् कृशत्वं बलहानिं तामग्निं च कुरुते कफवातं नियच्छति अथ पहे मगार्भपोटलीरसः सूतात्पादप्रमा-
णेन हेम्नः पिष्टिं प्रकल्पयेत् ४९ तयोः स्यात् द्विगुणो गंधो मर्दयेत्कांचनारिणा कृत्वा गोलं क्षिपे-
न्मूषासंपुटे रोधयेत्ततः ५० पचेद्भूधरयंत्रेण वासरत्रितयं बुधः ततउद्धृत्य तत्तुल्यं दद्याद्गंधं च तत्स-
मं ५१ मर्दयेदार्द्रकरसैश्चित्रकस्यरसेन च स्पूलपीतवराटीश्च पूरयेत्तेन युक्तितः ५२ एतस्माद्दो-
षध्यात् कुर्याद्दृढमांशेन टंकणं टंकणार्द्धं विषं दत्वा [illegible] पिष्ट्वा सेहुंडदुग्धकैः ५३ मर्दयेत्तेन का-

र०ध०
७५

स्फोटकेन वराटीनां मुखानि च मांडे चूर्णेनाऽलिप्ते पश्चात्तामुद्रां प्रदापयेत् ५४ गर्त्तेऽहस्तोन्मिते पश्चात्तापुटेत्कजपु
टेन च स्वांगशीतं रसं नीला प्रदद्यात्त्रीकनाथवत् ५५ पथ्यं मृगांकवद्द्वेयं त्रिदिनं लवणं त्यजेत्
यदा च्छर्दिर्भवेत्तस्य तदा छिन्नाश्रृतं तदा ५६ मधुयुक्तं तथा ऽश्लेष्मकोपे दद्यात्कुठारकं विरेके भर्जि
ताभंगा त्वदेयात्क्षिप्तसंयुता ५७ जयेत्कासं स्वयं श्वासं ग्रहणीं मरुच्चितथा ऽग्निं च कुरुते दीप्तं कफं
वातं नियच्छति ५८ हेमगर्भः पोटलो योरसः पोटकाभिधः । अथ पद्धितीयोहेमगर्भपोटलीरसः र
सस्य भागाश्चत्वारस्तावंतः कनकस्य च तयोश्च पिष्टिकां कृत्वा गंधो द्वादशभागिकः ५९ कुर्या
त्कज्जलिकां तेषां मुक्ताभागाश्च षोडश चतुर्विंशच्च शंखस्य भागैकं टंकणस्य च ६० एकत्र मर्द
येत्सर्वं पक्वनिंबुकजैरसैः कृत्वा तेषां ततो गोलं मूषासंपुटके न्यसेत् ६१ मुद्रां दत्वा ततो हस्तपात्रे राम
गर्भे च गोमयैः पुटेद्गजपुटैर्नैव स्वांगशीतं समुद्धरेत् ६२ पिष्ट्वा गुंजाचतुर्मानं दद्यात्कव्यान्स्मसंयुतं ए ७५

कोनत्रिंशद्गुञ्जामानमस्थिचैः सहदीयते ६३ राजतेमृण्मयेपात्रे कांचजे वावलेहयेत् लोकनाथरसं
पथ्यं कुर्यात्स्वयतमानसः ६४ कासेश्वासेक्षयेवातेकफेचग्रहणी अथ चमहोदधिरसः सौभा
ग्यं त्रिफला व्योषं तालं गंधोररसोमृतं ६५ प्रत्येकमेकभागं च जैपालं सप्तभागिकं भृंगराजरसेनैव
किंशुकस्य गदेररसेन वा ६६ यामयुग्मं विमर्द्याथ कुर्याद्गुंजोपमां वटीं अजीर्णकंटकः सोयं
रसराजः सकच्यते ६७ अतीसारे च पोक्तव्याघोटली हेमगर्भिका अथ महाज्वरांकुशोरसः शु
द्धं सूतं विषं गंधं प्रत्येकं शाणसंमितं ६८ धत्तूरबीजं त्रिशाणं स्यात्सर्वेभ्यो द्विगुणं भवेत् हेमाह्वा
कायेटपां चूर्णं सूक्ष्मं प्रयत्नतः ६९ देयं जंबीरमज्जाभिश्च गुंजाद्वयोन्मितं ऐकाहिकज्वरेसेवीपिज्वरंहं
तित्रिदोषजं ७० ऐकाहिकं द्व्याहिकं च त्र्याहिकं च चतुर्थिकं विषमं च ज्वरं हन्याद्दिव्यातोयं ज्वरांकुशः
७१ अथ पानंदभैरवोरसः त्रिकटु त्रिफला सूतं विषं गंधकटंकणं भट्टमल्लसमायुक्तं रसमानंदभैरवं

पा०५० ७६

७२ श्वासकासावनीरोचकज्वरमष्टविधं तथा गुल्मांश्च लं हरत्याशु गुडैकं भक्तत्यागरपि ७३ अथातीसारे
आनंदभैरवो रसः दरदं वत्सनाभं च मरिचं टंकणं कणा चूर्णयेत्सम भागेन सो ह्याऽऽनंदभैरवः ७४ गुडे
कं वाह्विगुंजं बालानां तु योजयेत् मधुना लेहयेच्चानु कुटजस्य फलं तथा ७५ चूर्णितं कर्षमात्रं
तद्धिदोषोत्थाऽतिसारजित् दध्यन्नं पाचयेत् पथ्यं गव्याजं तक्रमेव च ७६ पिपासा मांजलं शीतं विजा-
यात्सगुडां निशि अथ पंचामृतपर्पटिका भस्मरसः विषं पलमितं सूतः शाल्मिकस्य चूर्णयेत् द्वयं ७७ त
चूर्णं संपुटे क्षिप्त्वा काचलिप्तशरावयोः मुद्रां दत्वाथ संशोष्य तत्तस्त्वर्धां निवेशयेत् ७८ वह्निं शनैः
शनैः कुर्यात् प्रहरद्वयं संख्यया ततउद्धृत्य तन्मुपरिस्थशरावके ७९ सम्यग्लग्नो भवेत्सूतस्तं गृही
यात् शनैः वायुस्पर्शो यथा न स्यात्ततः कूप्यां निवेशयेत् ८० यावत्सूत्र्यामुखे लग्नं कुप्यान्निर्याति भे राम
षजं तावन्मात्रो रसो देयो मूर्छिते सन्निपातिनि ८१ रसेनानेन सततं मर्दितं वा गुल्मान् वर्षयेत् रक्तभे ७६

वराटीपूरयेत्तेनच्छागीक्षीरेणटंकणं पिष्ट्वा तेन मुखं रुध्वा भांडे तन्निरोधयेत् १ शुद्धं गजपुटे पक्त्वा
चूर्णयेत्स्वांगशीतलं रसोराजमृगांकोयं चतुर्गुंजस्य यापहः २ दशपिप्पलिकाक्षौद्रैरेकोनत्रिंशदूष
णैः स्त्रीकोपाग्निश्रमांस्त्यजेत्तस्य घृतं दापयेत्पथ्यं ३ पथ्यं च लघुमांस्यानि राजरोगप्रशांतये अथाग्नि
रसः शुद्धं सूतं द्विधा गंधं कुर्यात्खल्वेन कज्जलीं ४ तयोः समं तीक्ष्णचूर्णं मर्दयेत्कन्यकाद्रवैः द्विया
मांते कृतं गोलं ताम्रपात्रे विनिक्षिपेत् ५ आच्छाद्यैरंडपत्रेण यामार्द्धेऽत्युष्णतां व्रजेत् धान्यराशौ न्यसे
त्पश्चात्त्रिदिनांते समुद्धरेत् ६ संपीड्य गालयेद्वस्त्रे सत्यं वारितरं भवेत् संचूर्ण्य लोडयेत् क्षौद्रैः भक्षेन्निष्क
द्वयं द्वयं ७ अयमग्निरसो नाम्ना श्वासकासनिकृंतनः अथ श्वासकुठारो रसः रसं गंधं विषं चैव टंकणं
च मनःशिला ८ एतानि समभागानि मरिचं चाष्टटंककं एकैकं मरिचं दत्वा खल्वे सूक्ष्मं विधाय च १० त्रि
कटुः टंकमष्टं कं स्याद्दत्वा पश्चाद्विचूर्णयेत् सर्वमेकत्र संयोज्य काचकूप्यां विनिःक्षिपेत् ११ श्वासेका

रसा०यं० सेवनंदेऽग्नोतप्याश्लेष्माऽसयेषु च गुंजामात्रं प्रदातव्यं पर्णखंडेन बुद्धिमान १२ सन्निपातेषु मूर्छायाम

७८

पस्मारे तथा पुनः अतिमोहत्वमापन्नेन स्वेदं द्याद्धि चन्द्रणं: १३ रसः श्वासकुठारोऽयं सर्वश्वास वि-
कारजित् इति श्वासकुठाररसः अथ सर्वांगसुन्दरो वर्त्तीरसः सूताद्धें गंधं दिनैकं मर्दयेत् मेकं कन्यकाद्रवैः
१४ द्वयोस्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत् दिनैकं स्थालिकायंत्रे पक्वमारोप्य चूर्णयेत् १५ सर्वो
वर्त्तीरसो ह्येष हि गुंजा श्वासजिद्भवेत् अथ स्वच्छंदभैरवः शुद्धं सूतं मृतं लोहं ताप्यं गंधकतालकं शुद्ध
पथ्याग्निमंथनिर्गुंडी त्र्यूषणं टंकणं विषं तुल्यांशं मर्दयेत् खल्वे निर्गुंडिकाद्रवैः १७ मुंडीद्रावैर्दिनैकं तु द्वि
गुंजं वटकीकृतं भक्षयेद्वातरोगार्त्तो नाम्ना स्वच्छंदभैरवं १८ राजाऽमृतारेव दारु शुंठी वातारिजं शृतं स
गुग्गुलुं पिबेत् कोष्णमनुपानं सुखावहं १९ अथ हंसपोटलीरसः दग्ध्वा कपर्दिकान् पिष्ट्वा त्र्यूषणं टंक णम
णं विषं गंधकं शुद्धसूतं च तुल्यांशं वीरजैर्द्रवैः २० मर्द्दयेद्भक्षयेन्माषं मरिचाज्यं लिहेदनु निहंति ग्रह ७८

णीरोगं पथ्यं तक्रौदनं हितं २१ अथ महाताम्रेश्वरो रसः ताम्रं शिलां सूतं शुद्धं सैंधवं टंकणं समांशं

चूर्णयेत्खल्वे तावत् द्विगुणं गंधकं २२ गंधतुल्यं मृतं ताम्रं जंबीरैर्दिनपंचकं मर्द्यं द्विः पुटैः पाच्यं

मूषायां संपुटे दद्रे ३३ पुटे पुटे द्रवैर्मर्द्यं सर्वमेतन्नु घट्टयेत् द्विपलं मारितं ताम्रं लोहभस्म चतुःपलं २४

जंबीराम्लेन तत्सर्वं दिनं मर्द्यं पुटे लघु त्रिंशांशं विषं चास्य त्रिंशांशं वै विचूर्णयेत् २५ माहिषाज्येन संमिश्रं

निष्कार्द्धं भक्षयेत्सदा मध्वाज्यैर्वाकुचीचूर्णं कर्षमात्रं लिहेदनु २६ सर्वकुष्ठं निहंत्याशु महाताम्रेश्वरो र

सः अथ कुष्ठठारोरसः भस्मसूतसमो गंधो मृतायस्ताम्रगुग्गुलुः २७ त्रिफला च महानिंबश्चित्रक

श्च शिलाजतु स्तेतच्चूर्णितं कुर्यात् प्रत्येकं प्राणवोडशाः २८ चतुःषष्टिकरंजस्य बीजचूर्णं प्रकल्पयेत् चतुः

षष्टिमितं चाज्यं मध्वाज्याभ्यां विलोडयेत् २९ स्निग्धभांडे धृतं खादेद्द्विनिष्कं सर्वकुष्ठनुत् रसः कुष्ठ

कुठारोऽयं गलत्कुष्ठनिवारणः ३० अथ उदयादित्योरसः शुद्धसूतं द्विधा गंधं मर्द्यं कन्याद्रवैर्दिनं तद्गो

अथ त्रिनिष्कमारसः मृतं ताम्रं मृतं सीसं रसैः पाच्यं तु लोगितेद्रवे तत्ताम्रं शुद्धसूतं च समंसमं निर्गुंडीस्वरसैः मर्द्यं दिनं तद्गोल

कृतं यामैकं वालुकायंत्रे पाच्यं मोर्च्यं द्विगुंजप्रस्य मलं चेसजलं चानुपाययेत् रसस्त्रिविक्रमो नाम्ना मासैकेनाश्मरीप्रनुत्

157

शा० उ०
७६

लेपिष्टीमर्द्येताम्रपात्रेणरोधयेत् ३१ सप्तकात्रिमुलेनैव श्लक्ष्णैर्नाड्योमुखेनतत् पार्श्वेभस्मनिधाया
पपात्रोर्द्धेगोमयंजलं ३२ किंचित्किंचित्प्रदातव्यंचुल्ल्यां यामद्वयंपचेत् चंडाग्निनातदुद्धृत्यस्वांगशीतंवि
चूर्णयेत् ३३ काष्ठोदुंबरिकावह्निस्त्रिफलाराजवृक्षकं विडंगंवाकुचीवीजंक्वाथयेत्तेनभावयेत् ३४ दिने
कमृद्याद्दित्यारसोऽयंहिगुंजकः विचर्चिकादद्रुकुष्ठंश्वेतकुष्ठंचनाशयेत् ३५ अनुपानंचकर्तव्यंवा
कुचीफलचूर्णकं खदिरस्यकषायेणसमेनपरिपाचितं ३६ त्रिशाणंतद्वांचीसैः क्वाथैर्वीत्रेफलैः
पिबेत् त्रिदिनात्तेभवेत्स्फोटः सप्ताहाद्धाकिलाशके ३७ नीलीगुंजांचकासीसंधत्तूरंहंसपादि
कांस्नुहींव्यर्कचार्चागोरींपिष्ट्वामूत्रेणलेपयेत् ३८ स्फोटस्थानप्रशांत्यर्थंसप्तरात्रंपुनःपुनः श्वेत
कुष्ठंनिहंत्याशुसत्यंसाध्यंनसंशयः ३९ अथश्वित्रेलेपः गुंजाफलाग्निचूर्णंचलेपनंश्वेतकु राम
ष्ठनुत् शिलापामार्गभस्मापिलिप्ताश्वित्रंविनाशयेत् ४० अथभगंदरेकलादिरसः शुद्धसूतंविषंगं

७६

चंदनं नागं समतुल्यकं जीरकं सैंधवं त्र्यंबकं तिक्तकोषातकीद्रवैः ४१ पिष्ट्वा तल्लेपनाद्धंति मंडलान्यश्मगंदरं
रसः कलाविना मायं गुंजैको मस्तु मिश्रितैर्वेत् ४२ अथ सर्वेश्वरो रसः शुद्धं सूतं चतुर्गंधं पलं यामं वि
चूर्णयेत् मृततानाभ्रलोहानां दरदं च [प] पलं पलं ४३ सुवर्णं रजतं चैव ताम्रलेकं दशनिष्कं माषेकं म
[कुचिला] तवर्ज्जं चतालसत्वं पलद्वयं ४४ जंबीरोन्मत्तवासाभिः स्नुह्यर्कविषमुष्टिभिः मर्येऽहयारिजैद्रवैः
प्रत्येकेन दिनं दिनं ४५ एवं सप्त दिनं मर्द्येत ज्ञोलं वस्त्रवेष्टितं वालुकायंत्रे गंस्वेद्यं त्रिदिनं लघुवह्नि
ना ४६ आदाय चूर्णयेत् श्वेतगुंजापलैकं योजयेत् विषं द्विपलं पिप्पलीचूर्णमिश्रं सर्वेश्वरो रसः
४७ द्विगुंजं लेहयेत् क्षौद्रैः सुप्तिमंडलकुष्ठनुत् वाकुचीदेवकाष्ठं च कर्षमात्रं सुचूर्णयेत् ४८ लि
हेदेरंडतैलाक्तमनुपानं सुखावहं अथ स्वर्णक्षीरीरसः हेमाह्वा पंचपलिका निर्ह्यात तक्रघटे पचेत् ४९
तं पंचपलं तक्रे जीर्णे समुद्धृत्य पुनः क्षीरघटे पचेत् क्षीरे जीर्णे तदुद्धृत्य ... विशोषयेत् ५०

शा०ध०
८०

तच्चूर्णितं पंचपलं मरिचानां पलद्वयं पलैकं म्लेच्छितं तस्य तमेकीकृत्य तातु भक्षयेत् ५१ निष्कैकं स्फटिक
भ्रान्तेः स्वर्णक्षीरीरसो ह्ययं अपमेहवज्रोरसः भस्मसूतं मृतं कांतं मुंडभस्म शिलाजतु ५२ शुद्धं ताम्रं
शिलाव्योषं त्रिफलां ऽ कोलबीजकं कपित्थरजनी चूर्णं भृंगराजेन भावयेत् ५३ त्रिंशद्वारं विशोष्याथ
मधुयुक्तं लिहेत्सदा निष्कमात्रं हरेन्मेहान् मेहवज्रो रसो महान् ५४ महानिंबस्य बीजानि पिष्ट्वा षट्
संमितानि च पलं तंडुलतोयेन घृतनिष्कद्वयेन च ५५ एकीकृत्य पिबेच्चानु हंति मेहं चिरंतनं अथ
वह्निरसः शुद्धः सूतस्य गंधको रजनी त्रिफला शिवा ५६ प्रत्येकं च द्विभागं स्यात्त्रिवृज्जैपालचित्रकं प्रत्ये
कं च त्रिभागं स्यात्सर्वं दंती च पाययेत् ५७ प्रत्येकमष्टभागाः स्युर्द्वे कृत्वा विचूर्णयेत् जयंतीस्नुक्पय
योर्भृंगवह्निवातारितैलकैः ५८ प्रत्येकेन क्रमाद्भाव्यं सप्तधा च पृथक् पृथक् महावह्निरसो नाम निष्क
मुष्णजलैः पिबेत् ५९ विरेचनं भवेत्तेन तक्रं भक्तं ससैंधवं दिनांते दीयते पथ्यं वर्जयेच्छीतलं जलं ६० स

स्वर्णमाक्षि

राम
८०

वौदरहरः श्रीक्षोमरूटवातहरः परः अथ विद्याधरोरसः गंधकं तालकं ताप्यं मृतताम्रं मनः शिला ॥१॥ शु
द्धं सूतं च तुल्यांशं मर्दयेद्भावयेद्दिनं पिप्पल्याः स्तुकषायेण वज्रीक्षीरेण भावयेत् ॥२॥ निष्कार्द्धं मरि
चैर्लीढः गुल्मप्लीहादिकं जयेत् रसो विद्याधरो नाम गोनामगोमूत्रं च पिबेदनु ॥३॥ अथ पंचनेत्रोरसः टंक
णं हारितालं शृंगं स्वर्णं शुल्वं मृतं रसं दिनैकमार्द्रकद्रावैर्मर्द्यं रुद्ध्वा गजपुटे पचेत् ॥४॥ त्रिनेत्राख्यो रसः सोयं
माषैकं मधुना सह लिहेत् सैंधवं जीरकं हिंगु मधुना ज्याम्यां लिहेदनु ॥५॥ पंक्तिशूलहरः ख्यातो मासमा
त्रान्न संशयः अथ शूलगजकेसरीरसः शुद्धं सूतं द्विधा गंधं यामैकं मर्दयेद्दृढं ॥७॥ द्वयोस्तुल्यं शुद्ध
ताम्रं संपुटे तं निरोधयेत् ऊर्ध्वाधो लवणं दत्त्वा मृद्भांडे धारयेद्भिषक् ॥८॥ ततो गजपुटे पक्त्वा स्वांगशीतं स
मुद्धरेत् संपुटं चूर्णयेत्सूक्ष्मं पर्णखंडे द्विगुंजकं ॥९॥ भक्षयेत्सर्वशूलार्तो हिंगुशुंठी च जीरकं वचा मरि
च चूर्णं कर्षमुष्णजलैः पिबेत् ॥१०॥ असाध्यं नाशयेत् शूलं रसः स्यात् शूलकेशरी अथाग्नितुंडी

शा०प०
८१

वटीरसः शुद्धसूतं विषं गंधं अजमोदा फलत्रयं ७१ स्वर्जिक्षारं यवक्षारं वह्निसैंधवजीरकं सौवर्च
लं विडंगानि सामुद्रं त्र्यूषणं समं ७२ विषमुष्टिः (कुचिला) सर्वैस्तुल्यां जंबीराम्लेन मर्दयेत् मरिचाभां वटीं खादे
द्वह्निमांद्यप्रशांतये ७३ अथ अजीर्णकंटकोरसः शुद्धसूतं विषं गंधं समं सर्वं विचूर्णयेत् मरिचं सर्व
तुल्यांशं कंटकार्याः फलद्रवैः ७४ मर्दयेद्भावयेत्तस्मै एकविंशतिवारकं वटीं गुंजात्रयं खादेत्सर्वा
जीर्णप्रशांतये ७५ अजीर्णकंटकः सोयं रसो हंति विसूचिकां अथ पंचाननभैरवोरसः मृतं सूतं मृ
[illegible] तं ताम्रं हिंगुप्रमुक्करमूलं ७६ सैंधवं गंधकं तालं कटुकी चूर्णयेत्समं पुनर्नवा देवदा
ली निर्गुंडी तंडुलीयकैः ७७ तिक्तकोशातकी (बेलतेलडे) द्रावैर्दिनैकं मर्दयेद्दृढं माषमात्रं लिहेत्क्षौद्रैः रसो यं पंचा
ननभैरवः ७८ कफरोगप्रशांत्यर्थं निंबक्वाथं पिबेदनु अथ वातनाशनो रसः मृतहाटकवज्राणि ताम्रं लोहं च
माक्षिकं ७९ तालं नीलांजनं तुल्यमब्धिफेनं समांशकं पंचानां लवणानां च भागमेकं विमर्दयेत् ८० वज्रीक्षी

राम
८१

रैर्दिनैकं तु रुध्वा भूधरे पचेत् माषैकमार्द्रकद्रावैर्लेहयेद्वातनाशनं ८१ पिप्पलीमूलजं क्वाथ सक्षौद्रमनुपाययेत् सर्वान्वात
विकारांस्तु निहंत्याक्षेपकं तथा ८२ अथ कनकसुंदरो रसः कनकस्याष्टभागाः स्युः सूतो द्वादशभिर्मितः गंधोपि द्वादश प्रोक्तस्ता
म्रं शाणाद्वयोन्मितं ८३ अभ्रकं स्याच्चतुः शाणं माक्षिकं च द्विशाणिकं वंगो द्विशाणो सौवीरस्त्रिशाणो लोहमष्टकं ८४ विषं त्रि
शाणिकं कुर्यात्लांगली पलसंमितं मर्दयेद्दिनमेकं तु रसैरम्लफलोद्भवैः ८५ दद्याद्गजपुटं वन्हौ ततः शुद्धं विचूर्णयेत् माषमा॥
त्रो रसो देयः सन्निपाते सुदारुणे ८६ आर्द्रकस्वरसेनैव रसोऽम्लरसेन वा किलासं सर्वकुष्ठानि विसर्पं च भगंदरं ८७ ज्वरं गरम।
जीर्णं च जयेद्रोगहरो रसः अथ सन्निपातभैरवः रसो गंधस्त्रिकं पीतं तु कुर्यात्कज्जलिकां तयोः ८८ ताराभ्रताम्रवंगाहिसाराण्येके
ककार्षिका शिग्रुज्वालामुखी शुंठी विल्वैरंडतंडुलीयकात् ८९ प्रत्येकं स्वरसैः कुर्यात् यामैकैकं विमर्दनं कृत्वा गोलं वस्त्रवद्धं॥
लेवणापूरिते न्यसेत् ९० कांचभांडे ततः स्थाल्यां कांचकूपीं निवेशयेत् वालुकाभिः प्रपूर्याथ वन्हिर्यामद्वयं भवेत् ९१ ततउद्धृत्य तं
गोलं चूर्णयित्वा विमिश्रयेत् प्रवालचूर्णकं वैराटशाणमात्र विषेणा च ९२ कृष्णसर्पस्य गरले हिङ्गुवेलं भावयेत्तथा तगरं मशलो
मांसी हेमाह्वा वेतसः ९३ नीलिनी पत्रकं चैला चित्रकम्बकुठेरकः शतपुष्पा देवदाली धत्तूरा मभरोगस्त्य मुंडिका ९४ मधूकजाती।
मर्दनरसैरेषां विमर्दयेत् प्रत्येकमेकवेलं ततः संशोष्य धारयेत् ९५ बीजपूरार्द्रकद्रावैः मरिचैः षोडशोन्मितैः रसो हिंस्य गुंजाप्रमितः

२ सन्निपाते सुदारुणे ९६ प्रसिद्धोयं रसो नाम्ना नाम्ना सन्निपातस्य भैरवः अथ ग्रहणीकपाटः तारमौक्तिकहेमानि सारश्चैकैक
भागिकाः ९७ द्विभागो गंधकः सूतस्त्रिभागो मर्दयेदिमान् कपित्थस्वरसैर्गाढं मृगशृंगे ततः क्षिपेत् ९८ पुटेन्मध्यपुटेनैव तत
स्तदुद्धृत्य मर्दयेत् बलारसैः सप्तवेलमपामार्गरसैस्त्रिधा ९९ लोध्रप्रतिविषामुस्ताधातकीन्द्रयवाऽमृताः प्रत्येकमेतत्स्वरसैः
र्भावयेत्स्यात्त्रिधा त्रिधा १०० माषमात्रो रसो देयो मधुना मरिचैस्तथा हन्यात्सर्वानतीसारान् ग्रहणीं सर्वजामपि १ कपाटो
ग्रहणीरोगे रसोयं वह्निदीपनः अथ ग्रहणीवज्रकपाटः मृतसूताभ्रकं गंधं यवक्षारं सटंकणं २ अग्निमंथं च वा कुर्या
त्सूततुल्यानिमान् सुधीः ततो जयंतीजंबीरभृंगद्रावैर्विमर्दयेत् ३ त्रिवासरं ततो गोलं कृत्वा संशोष्य धारयेत् लोहपा
त्रे शरावे चद्त्वोपरि विमुद्रयेत् ४ अधो वह्निं शनैः कुर्याद्यामार्द्धं तत उद्धरेत् सरतुल्यां प्रतिविषां दद्यान्मोचरसं तथा ५ क
पित्थविजयाद्रावैर्भावयेत्सप्तधा पृथक् धातकीन्द्रयवामुस्तालोध्रं बिल्वं गुडूचिका ६ एतद्रसैर्भावयित्वा वेलैकैकं विशोषये
त् रसं वज्रकपाटाख्यं शाणैकं मधुना लिहेत् ७ वह्निं शुंठी विडं बिल्वं लवणं चूर्णयेत्समं पिबेदुष्णांबुना चानु सर्वँ ग्रहणीं जं
जयेत् ८ अथ मदनकामदेवो रसः तारं वज्रं सुवर्णं च ताम्रं सूतं च गंधकं लोहं क्रमविवृद्धानि कुर्यादेतानि मात्रया ९ विम
र्द्य कन्याकाद्रावैर्न्यसेत्काचमये घटे विमुच्य पिठरीमध्ये धारयेत्सैंधवेऽग्निना १० पिठरीं मुद्रयेत्सम्यक् ततश्चुल्ल्यां विशेषयेत् ११

वह्निं शनैः शनैः कुर्याद्दिनैकं तत उद्धरेत् ११ खांगरीतं तं च सं चूर्ण्य भावयेत् दर्क दुग्धकैः अश्वगंधा च काकोली वानरी मुश
ली सुरा १२ त्रिविलं रसेरासांश तावर्या च भावयेत पञ्चकं द्रकुसेरूणां रसैः कासस्य भावयेत् १३ कस्तूरी ओषकर्पूरकं
कोलेलालवंगकैः पूर्वचूर्णाद्द्यमांशमेतच्चूर्णं विमिश्रयेत् १४ शर्करां च समां दत्वा ततः शाणोन्मितं पिबेत् गोदुग्धद्विपले
नैव मधुराहाररसेवकः १५ अस्य प्रभावात्सौदर्यं बलं तेजो विवर्द्धते ता रुणीरमयेद्दृद्धीनं चहानिः प्रजायते १६ अथ कंदर्प
सुंदरो रसः सूतो वज्रो महिर्मुक्ता तारं हेमासिताभ्रकं रसैः कर्पांशकानेतान्मर्दयेद्दरिमेदजैः १७ प्रवालचूर्णं गंधं च द्वि द्वि कर्ष
विमिश्रयेत् ततोश्वगंधा खनसे वुरसैर्विमर्दीमगमंगवै १८ सिद्धा मद्दुपुटे पक्वा भावयेद्धातकीरसैः काकोली मधुकं मां
सी बलात्रयविषंगुरी १९ द्राक्षापिप्पलिचंद्राकवरीपर्णीचतुष्टयं परूषकं कसेरू मधुकं वानरी तथा २० भावयित्वा रसैरेषां
शोषयित्वा विचूर्णयेत् एलात्वक्पत्रकोमांसीलवंगागुरुकेसरं २१ मुस्तं मृगमदः कृष्णाजलं चंद्रं च मिश्रयेत् एतच्चूर्णैः शा
णमितैः रसं कंदर्पसुंदरं २२ खादेच्छाणमितं रक्तो सिताधात्री विदारिका एतासां कर्षचूर्णेन सर्पिः कर्षेण संमितं २३ तस्या
नुद्विपलं क्षीरं पिबेत्सुखितमानसः रमणीरमयेद्दृद्धोनेहानिं क्वापि गच्छति २४ अथ लोहरसायनं शुद्धं रसेंद्रं भागेकं द्वि
भागं शुद्ध गंधकं क्षिपेत्कज्जलिकां कुर्यात्तत्रतीक्ष्णाभवंरजः २५ सिद्धा कज्जलिकां तुल्यं प्रहरैकं विमर्दयेत् ततः कन्याद्रवे

प्रथम लेमा रसकपूर मासा ६ हिंगरफ ४ कत्था ८ कराफल ८ मुरदासंग ८ लाफची ४ जमालगुटा ४
सफेदा ४ मासा तोला ४ सोका माखन बजल मे धोवै १२ अही वार वाही मे पी सामिलावै ... त्यावे नीकलेय

८३ घर्मे त्रिदिनं परिमर्द्दयेत् २६ ततः संजायते तस्य सोष्मो धूमोद्गमो महान् अथ तत्पिंडितं कृत्वा ताम्रपात्रे निधाय च २७ मध्ये धा
न्यकुशूलस्य त्रिदिनं धारयेत् बुधः उद्धृत्य तस्मात् खल्वे च क्षिप्त्वा घर्मे निधाय च २८ रसैः कुठारच्छिन्नायास्त्रिवेलं परिभावयेत्
संशोष्य घर्मे क्वाथैश्च भावयेत् त्रिकटोस्त्रिशः २९ वासामत्ताचित्रकाणां रसैर्भाव्यं पृथक् पृथक् लोहपात्रे ततः क्षिप्त्वा भावये
त् त्रिफलाजलैः ३० निर्गुंडीदाडिमत्वग्भिर्विषमुंगाकुरंटकैः पलाशकदलीद्रावैर्बीजकस्य शृतेन च ३१ नीलिकालंबुषा
द्रावैर्वैर्बूलफलिकारसैः भावयेत् त्रित्रिवेलं च ततो नागबला रसैः ३२ बलावरागोक्षुरकैः पातालगरुडीरसैः त्रित्रिवेलं या
थालाभं भावयेदेभिरौषधैः ३३ ततः प्रातर्लिहेत्तल्लोहं सर्पिर्भ्यां कोलमात्रकं पलमात्रकं वराक्वाथं पिवेदस्यानुपानकं ३४
मासत्रयात् शीलितं स्याद्वलीपलितनाशनं मंदाग्निश्वासकासांश्च पांडुतां कफमारुतौ ३५ पिप्पलीमधुसंयुक्ता हन्यादेतन्न
संशयः वातासृङ्मूत्रदोषांश्च ग्रहणीं तोयजां रुजं ३६ अंडवृद्धिं जयेदेतत् छिन्नासत्त्वमधुप्लुतं बलवर्णकरं वृष्यमायुष्यपरमं
स्मृतं ३७ जयेत्सर्वामयान् कालाद्रिष्टं लोहरसायनं प्रक्षेपौषधमेतस्मिन् प्रदद्यात् कोलमात्रकं ३८ कूष्मांडं तिलतैलं च माषान्नं
राजिकां तथा मद्यमम्लरसं चैव त्यजेल्लोहस्य सेवकः ३९ इति श्रीदामोदरसूनोः शार्ङ्गधरविरचितायां संहितायां चिकित्सा
स्थाने रसकल्पनाविधिरध्यायः ॥ ॥ इति मध्यमखंडः समाप्तः ॥ स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा मज्जा च तं पिबे ८३

न्नसौः किंचिदभ्युदिते रवौ १ स्थावरो जंगमश्चैव द्वियोनिः स्नेह उच्यते तिलतैलं स्थावरेषु जंगमेषु घृतं वरं २ द्वाभ्यां त्रिभि
श्चतुर्भिस्तुर्यामकैः संशुध्यति महाग्निर्वा त्र्यहं चतुरहं पंचाहं षडहं तथा ३ सप्तरात्रात्परं स्नेहः सात्मीभवति सेवितः दो
षाकालाग्निवयसां बलं दृष्ट्वा प्रयोजयेत् ४ हीनां च मध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान अमात्रया तथा काले मिथ्या
हारविहारतः ५ स्नेहः करोति शोफार्शस्तंद्राविसंज्ञिताः देयादौ प्राग्नये मात्रा सु स्नेहस्य पलसंमिता ६ मध्यमा पत्रि
कर्षा स्याज्जघन्याद्धिकार्षिकी अथवा स्नेहमात्रा स्युस्तिस्रोऽन्याः सर्वसंमताः ७ अहोरात्रेण महती जीर्यत्यन्हि तु
मध्यमा जीर्यत्यऽल्पा दिनार्द्धे च सा विज्ञेया सुखावहा ८ अल्पा स्याद्दीपनी वृष्या स्वेद्ये पूजिता मध्यमा स्नेहनी ज्ञे
या वृंहणी च महारिणी ९ ज्येष्ठा कुष्ठविषोन्माद ग्रहापस्मारनाशिनी केवलं पैत्तिके सर्पिर्वातिके लवणान्वितं
१० पेयं बहुकफे वापि व्योषक्षारसमन्वितं रूक्षक्षत विषार्त्तानां वातपित्तविकारिणां ११ हीनमेधास्मृतीनां च सर्पिःपा
नं प्रशस्यते कृमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः १२ पिबेयुस्तैलसात्म्याये तैलं दार्ढ्यार्थिनस्तु ये व्यायामकर्शि
ताः शुष्करेतो रक्तमहारुजः १३ महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः क्रूराशयाः क्लेशसहा वातार्त्ता दीप्त
वह्नयः १४ मज्जानं वा पिबेयुस्ते सर्पिर्वा सर्वतो हितं शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि १५ वातपित्ताधिके

167

२४

रात्रौवातश्लेष्माधिकेदिवा नस्याभ्यंजनगंडूषमूर्द्धकर्णाक्षितर्पणे: १६ तैलंघृतंवायुंजीतदृष्ट्वादोषबलाबलं घृते
कोष्णंजलंपेयंतैलेयूषःप्रशस्यते १७ वसामज्ञापिबेन्मंडमनुपानंसुखावहं स्नेहद्विषःशिशून्वृद्धान्सुकुमारानकृशा
नपि १८ तृष्णालुकानुष्णकालेसहभक्तेनपाययेत् घृतयुक्ताबहुतिलायवागूःस्वल्पतंदुला १९ सुखोष्णासेव्यमानातुस
द्यःस्नेहानुकारिणी शर्कराचूर्णसंसृष्टे दोहनस्थेघृतेतुगां २० दुग्धक्षीरंपिबेदुष्णंसद्यःस्नेहनमुच्यते मिथ्याहाराद्बहुत्वा
द्वायस्यस्नेहोनजीर्यति २१ विष्टभ्यवापिजीर्येतवारिणोष्णेनवामयेत् स्नेहस्याजीर्णशंकायांपिबेदुष्णोदकंनरः २२ तेनो
द्गारोभवेत्शुद्धोभक्तेप्रतिरुचिस्तथा स्नेहेनपैत्तिकस्यापिजिनयेणाहातीस्यात्तरोभवेत् २३ तदास्योदीरयेत्स्वच्छंविषमांतस्य
पाययेत् शीतंजलंपाययेच्चपिपासातेनशाम्यति २४ अजीर्णीवर्जयेत्स्नेहमुदरीतरुणोज्वरी दुर्बलोरोचकीस्थूलोमूर्छार्तो
मदपीडितः २५ दत्तबस्तिर्विरिक्तश्चवांतस्तृष्णाश्रमान्विताः अकालप्रसवानारीदुर्दिनेचविवर्जयेत् २६ स्वेद्यसंशोध्यमद्यम
द्यस्त्रीव्यायामासक्तचिंतकाः वृद्धबालकृशारूक्षाःक्षीणास्राःक्षीणरेतसः २७ वातार्तास्तिमिरार्ताश्चयेतेषांस्नेहनमुत्तमं वाता
नुलोम्यंदीप्ताग्निर्वर्चःस्निग्धमसंहतं २८ मृदुस्निग्धगात्रत्वग्ग्लानिःस्नेहोद्वेगोऽथलाघवंविमलेंद्रियतासम्यक्स्निग्धोरूक्षो
विपर्ययः २९ भक्तद्वेषोमुखस्रावोगुदेदाहप्रवाहिका तंद्रातिसारःपांडुत्वंभृशंस्निग्धस्यलक्षणं ३० रूक्षस्यस्ने

८३

168

स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितः उपनाहो द्रवस्वेदः सर्वे वातार्तिहारिणः २

हनं स्नेहैरतिस्निग्धस्य रूक्षणं श्यामाकचणकाद्यैश्च तक्रपिण्याकसक्तुभिः ३१ दीप्ताग्निः मृदुकोष्ठश्च पुष्टधातुर्बलें
द्रियः निर्जरो बलवर्णाढ्यः सेवी भवेन्नरः ३२ स्नेहो व्यायामसंशीतवेगाघातप्रजागरान् दिवास्वप्नमभिष्यन्दि रूक्षा
न्नं च विवर्जयेत् ३३ इति श्रीदामोदरसूनोः शार्ङ्गधरेण विरचितायां स्नेहपानविधिरध्यायः ॥ अथ स्वेदविधिः स्वेदोत्ता
पोष्मजौ प्रायः श्लेष्मघ्नौ समुदीरितौ उपनाहस्तु वातघ्नः पित्तरोगे द्रवो हितः ३५ महाबले महाव्याधौ शीते स्वेदो महान् स्मृतः
दुर्बले दुर्बलस्वेदो मध्ये मध्यमो मतः ३६ बलासे रूक्षणः स्वेदो रूक्षस्निग्धः कफानिले कफमेदोवृते वात्ते कोष्णगेहं रवेः करान्
३७ नियुद्धं मार्गगमनं गुरुप्रावरणं क्षुधं चिन्ताव्यायामभारांश्च सेवेतामयमुक्तये ३८ येषां नस्यं विधातव्यं वस्तिश्चापि हि देहिनां
शोधनीयाश्च ये केचित् पूर्वं स्वेद्यास्तु ते मताः ३९ स्वेद्याः पश्चात्त्रयो ज्ञेया हि भगंदरिणोऽर्शसास्तथा अश्मर्याचातुरो जंतुः शमयेत् शस्त्रकर्मणः
४० पश्चात्स्वेद्या गते शल्ये मूढगर्भगते तथा काले प्रसूता काले वा यश्चात्स्वेद्या नितंबिनी ४१ सर्वान्स्वेदान्निवाते च जीर्णाहारे च का
रयेत् स्वेदात्तु स्विन्नाः रोगाः स्नेहक्लिन्नस्य देहिनः ४२ द्रवत्वं प्राप्य कोष्ठं तु गत्वा यान्ति विरेकतां स्विद्यमानशरीरस्य हृदयं शीतलैः स्
स्पृशेत् ४३ स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी अजीर्णी दुर्बलो मेही क्षतक्षीणः पिपासितः ४४ अतीसारी रक्तपित्ती
पांडुरोगी तथोदरी मद्यार्तो गर्भिणी चैव न हि स्वेद्या विजानता ४५ स्वेदाद्येषां यान्ति देहा विनाशं नो साध्यत्वं यान्ति चैषां विकाराः एता

८५ नपिम्दुस्वेदैः स्वेदसाध्यानुपाचयेत् मृदुस्वेदं प्रयुंजीत तथा हृन्मुष्कदृष्टिषु ४६ अतिस्विन्नेसंधिपीडादाहस्तृष्णाक्लमो भ्रमः पित्तास्रक्पिटकाकोपस्तत्रशीतैरुपाचरेत् ४७ तेषुतापाग्निधः स्वेदोवालुकावस्त्रपाणिभिः कपालकंदुकांऽगारैर्यथापूर्वंप्रशस्यते ४८ ऊष्मस्वेदः प्रकर्तव्योलोहपिंडेष्टकाश्मभिः प्रतप्तैरम्लसिक्तैश्चकायेनक्तकवेष्टितैः ४९ अथवा वातनिर्नाशिद्रव्यक्वाथरसादिभिः उष्णैर्घटं पूरयित्वायाम्पैच्छिद्रंनिधायच ५० विमुच्यास्यंत्रिवक्रांच धातुजामुत्तमष्टडंगुलास्यांगोमुखांनाडीयुंज्याद्धस्तिकां ५१ सुखोपविष्टंस्वभ्यक्तंगुरुप्रावरणावृतं हस्तिमृडिकयानाड्यास्वेदयेद्वात रोगिणां ५२ पुरुषायाममात्राःवाभूमिमुत्कीर्यखादिरैः काष्ठैर्दग्ध्वातथाऽभ्युक्ष्यक्षीरधान्याम्लवारिभिः ५३ वातघ्नपत्रैराछाद्यशयानंस्वेदयेत्ततः एवंमाषादिभिः स्विन्नैःशयानः स्वेदमाचरेत् ५४ तथोपनाहस्वेदंचकुर्याद्वातहरौषधैः प्रदिह्यदेहंवातार्तंक्षीरसरसान्वितैः ५५ अम्लपिष्टैःसलवणैःसुखोष्णैःस्नेहसंयुतैः उपाग्न्यास्यानूपमांसैर्जीवनीयगणेनच ५६ दधिसौवीरकक्षारैर्वीरतर्वादिनातथा कुलत्थमाषगोधूमैरतसीतिलसर्षपैः ५७ शतपुष्पादेवदारुशेफालीस्थूलजीरकैः एरंडमूलबीजैश्चरास्नामूलकशिग्रुभिः ५८ मिसिकृष्णाकुठेरैश्चलवणैरम्लसंयुतैः प्रसारण्याश्वगंधाभ्यांबलाभिर्दशमूलकैः ५९ गुडूचीवानरीबीजैर्यथालाभैःसमाहृतैः क्षुण्णैःस्विन्नैश्चवस्त्रेणावेष्टैःसंस्वेदयेन्न ८५

रं ६० महाशाल्वणसंज्ञोयंयोगः सर्वानिलार्त्तिहृत् द्रवस्वेदस्तुवातघ्नद्रव्यक्काथेनपूरिते ६१ कटाहेकोष्ठकंवापिसूपविश्यो
ऽवगाहयेत् सौवर्णेराजतेवापिताम्रमायदायसदारुजे ६२ कोष्ठकंतत्रकुर्वीतोच्छ्रायेषट्त्रिंशदंगुलं आयामेतावदेवस्या
च्चतुष्कमस्रंतथा ६३ नाभेःषडंगुलंयावत् मग्नःक्काथस्यधारया कोष्णयास्कंधयोःसिक्तःस्तिष्ठेत् स्निग्धतनुर्नरः ६४ रा
वंतैलेनदुग्धेनसर्पिषास्वेदयेन्नरं एकांतरोद्व्यंतरोवास्नेहोयुक्तोऽवगाहने ६५ शिरामुखैरोमकूपैर्धमनीभिश्चतर्पयन् शा
रीरेबलमाधत्तेयुक्तःस्नेहोऽवगाहने ६६ जलसिक्तस्यवर्द्धंतेयथामूलेऽङ्कुरास्तरोः तथाधातुविवृद्धिर्हिस्नेहसिक्तस्यजायते ६७
नातःपरतरःकश्चिदुपायोवातनाशनः शीतशूलव्युपरमेस्तंभगौरवनिग्रहे ६८ दीप्तेऽग्नौमार्दवेजातेस्वेदनाद्विरतिर्मता सम्य
क्खिन्नंविमर्दितंस्नातमुष्णांबुभिःशनैः ६९ भोजयेच्चानभिष्यंदिव्यायामंचनकारयेत् ॥ इतिश्रीदामोदरसूनोःशार्ङ्गधरेणावि
रचितायांचिकित्सास्थानेस्वेदविधिरध्यायः अथवमनविधिः वमनंरेचनंनस्यंनिरूहश्चानुवासनं ७० एतानिपंचकर्माणि ॥
कथितानिमुनीश्वरैः शरत्कालेवसंतेचप्रावृट्कालेचदेहिनां ७१ वमनंरेचनंचैवकारयेत्कुशलोभिषक् बलवंतंकफव्याप्तंह
ह्ल्लासादिनिपीडितं ७२ तथावमनसात्म्यंचधीरचित्तंचवामयेत् विषदोषेस्तन्यरोगेमंदेऽग्नौश्लीपदेऽर्बुदे ७३ हृद्रोगकुष्ठवीसर्प
मेहाजीर्णभ्रमेषुच विदारिकापचीकासश्वासपीनसवृद्धिषु ७४ अपस्मारज्वरोन्मादतथारक्तातिसारिषु नासाताल्वोष्ठपा

८६

केषु करीशावेऽग्निजिह्वके १५ गलशुण्ड्यामतीसारे पित्तश्लेष्मगदे तथा मेहोगदे शरः शूले पार्श्वशूले च पित्तजे
१६ सद्योज्वरे स्त्रियौ चैव वमनं कारयेद्भिषक् नवाम तीक्ष्ति मिरी न गुल्मी नोदरी कृशः १७ नाति वृद्धो गर्भिणी च न स्थूलो
न क्षतातुरः मदार्तो बालको रूक्षः क्षुधितश्चानिरूहितः १८ उदावर्त्यूर्ध्वरक्ती च दुःखितः केवलानिली पाण्डुरोगी कृमि
व्याप्तः पठनात्स्वरघातकः १९ एतेप्यजीर्णव्यथिता वाम्या ये विषपीडिताः कफव्याप्ताश्च ते वाम्या मधुकक्वाथपानतः २०
सुकारं कृशं बालं वृद्धं भीरुं च वामयेत् पीत्वा यवागूमाकंठं क्षीरतक्रदधीनि च २१ असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्ले
श्यदेहिनः स्निग्धस्विन्नस्य वमनं दत्वा सम्यक् प्रवर्तते २२ वमनेषु च सर्वेषु सैंधवं मधुना हितं बीभत्सं वमनं द
याद्विपरीतं विरेचनं २३ क्वाथ्यद्रव्यस्य कुडवं श्रपयित्वा जलाढके अर्द्धभागावशिष्टं च वमनेष्ववतारयेत् २४ क्वाथ
पानेन च प्रस्थाः श्रेष्ठा मात्रा प्रकीर्तिता मध्यमा च शिमता प्रोक्ता त्रिप्रस्था च कनीयसी २५ कल्कचूर्णावलेहानां त्रिपलं
श्रेष्ठमात्रया मध्यमं द्विपलं विंद्यात्कनीयस्तु पलं भवेत् २६ वमने चा [illegible] पि वेगाः स्युरष्टौ पित्तांतदुत्तमः षड्वेगा म
ध्यमा वेगाश्चत्वारस्त्ववरे मताः २७ वमने च विरेके च तथा शोणितमोक्षणे सार्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥
२८ कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् सुस्वादुलवणाम्लोष्णैः संसृष्टं वायुना कफं २९ कृष्णानुराढफलं सिं

८६

धुंकफेकोष्णजलैः पिबेत् पटोलवासानिंबश्च पित्ते शीतजलं पिबेत् ९० सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् अ
जीर्णे कोष्णपानीयसिंधुं पीत्वा वमेत्सुधीः ९१ प्रसेकोहृद्ग्रहः कोष्ठः कंडूदुरा छर्दिते भवेत् अतिवांते भवेत्तृष्णा हिक्कोद्गारो
विसंज्ञता ९२ जिह्वानिःसर्पणं चाक्ष्णो व्यावृत्तिर्हनुसंहतिः रक्तछर्दिष्ठीवनं च कंठपीडा च जायते ९३ वमनस्यातियोगे
च मृदु कुर्याद्विरेचनं वमनांतः प्रविष्टायां जिह्वायां कवलग्रहः ९४ स्निग्धाम्ललवणैर्हृद्यैर्घृतक्षीररसैर्युतः फलान्य
म्लानि खादेयुस्तस्य चाग्रेन्येग्रतो नराः ९५ निःसृतां तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत् आवृत्ते क्षिणी घृताभ्यक्ते पीडयेच्च शनैः
शनैः ९६ हनुमोक्षे स्मृतः स्वेदो नस्यं च श्लेष्मवातहृत् रक्तपित्तविधानेन रक्तछर्दिमुपाचरेत् ९७ धात्रीरसांजनोशीरलाजचंदन
वारिभिः मंथं कृत्वा पाययेच्च सघृतक्षौद्रशर्करं ९८ शाम्यं स्पनेन तृष्णायाः पीडा छर्दिसमुद्भवा हृत्कंठशिरसां शुद्धिर्दीप्ताग्नित्वं
च लाघवं ९९ कफपित्तविनाशश्च सम्यग्वांतस्य चेष्टितं ततो परान्हे दीप्ताग्निं मुद्गषष्टिकशालिभिः १०० हृद्यैश्च जांग
लरसैः कृत्वा यूषं च भोजयेत् तंद्रा निद्रास्यदौर्गंध्यं कंडूग्रहणहृद्विषं १ सुवांतस्य न पीडायै भवंत्येते कदाचन अजीर्णं
शीतपानीयं व्यायामं मैथुनं तथा स्नेहाभ्यंगं प्रकोपं च दिनैकं वर्जयेत्सुधीः ।। इति श्री दामोदरसूनुना शार्ङ्गधरेण विरचिता चि

173

यांसंहितायांवमविधिरध्यायः॥ अथविरेचनविधिः स्निग्धस्विन्नस्यवांतस्यदद्यात्सम्यग्विरेचनं ३ अवांतस्य त्वधःस्रस्तो
ग्रहणींछादयेत्कफः मंदाग्निंगौरवंकुर्याज्जनयेद्वाप्रवाहिकां ४ अथवापाचनैरामंबलासंचविपाचयेत् स्निग्धस्यस्नेह
नैःकार्यंस्वेदैःस्विन्नस्यरेचनं ५ शरदृतौवसंतेचदेहशुद्धौविरेचयेत् अन्यदात्ययिकेकार्येशोधनंशीलयेद्बुधः ६ पित्तेविरेच
नंयुंज्यादामोद्भूतेगदेतथा उदरेचतथाध्मानेकोष्ठशुद्धौविशेषतः ७ दोषाःकदाचित्कुप्यंतिजितालंघनपाचनैः येतुसंशो
धनैःशुद्धानतेषांपुनरुद्भवः ८ बालवृद्धावतिस्निग्धःक्षतक्षीणोभयान्वितः श्रांतस्तृषार्तःस्थूलश्चगर्भिणीचनवज्वरी ९
नवसूतानारीचमंदाग्निश्चमदात्ययी शल्यार्दितश्चरूक्षश्चनविरेच्याविजानता १० जीर्णज्वरीगरव्याप्तोवातरक्तीभगंदरी अ
र्शःपांडूदरग्रंथिहृद्रोगारुचिपीडिताः ११ योनिरोगप्रमेहार्त्तगुल्मप्लीहव्रणार्दिताः विद्रधिच्छर्दिविस्फोटविशूचीकु
ष्ठसंयुता १२ कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः प्लीहशोथाक्षिरोगार्ताःकृमिक्षारानिलार्दिताः १३ अलिनोमू
त्रघातार्ताविरेकार्हानरामताः बहुपित्तोमृदुःप्रोक्तोबहुश्लेष्माचमध्यमः १४ बहुवातःक्रूरकोष्ठोदुर्विरेच्यःसकथ्यते मृद्वी
मात्रामृदौकोष्ठेमध्यकोष्ठेचमध्यमा १५ क्रूरेतीक्ष्णामताद्रव्यैर्मृदुमध्यमतीक्ष्णकैः मृदुर्द्राक्षापयोचंचुतैलैरपिविरेच्यते॥

१६ मध्यमस्त्वल्पतातिक्ताराजवक्षैर्विरिच्यते क्रूरस्तु पयसा हेमक्षीरीदंतीफलादिभिः १७ मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफां
तिकैः मदु द्वित्राः पयोपि च वेगैर्विंशतिभिर्मध्याहीनोत्ता दशवेगकैः १८ द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत् पलार्द्धं
च कषायाणां कनीयस्तु विरेचनं १९ कल्कमोदकचूर्णानां कर्षं मध्वाज्यलेहयोः कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया
२० पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत् त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः २१ त्रिवृत्सैंधवशुंठीनां चूर्णं
मल्मैः पिबेन्नरः वातार्दितो विरेकाय जांगलानां रसेन वा २२ एरंडतैलं त्रिफलाक्वाथेन द्विगुणेन वा मूलं पीतं पयोभिर्वा द्रुतविरे
कायपरेण विरिच्यते २३ स्वक्ताकोटजंवीपिप्पलीविश्वभेषजं समद्राक्षारसक्षौद्रं वर्षाकाले विरेचनं २४ त्रिवृद्दुरालभामुस्ताशर्क
रोदीच्यचंदनं द्राक्षांबुना सयष्ट्याह्वं शीतलं च घनात्यये २५ त्रिवृतां चित्रकं पाठामजाजीं सरलं वचां हेमक्षीरीं च हेमंते चू
र्णमुष्णांबुना पिबेत् पिप्पलीनागरं सिंधुश्यामात्रिवृत्तया सह लिहेत् क्षौद्रेण शिशिरे वसंते च विरेचनं २६ त्रिवृत्ता शर्करा
तुल्या ग्रीष्मकाले विरेचनं सुखविरेचनमाह अभयामरिचं शुंठी विडंगामलकानि च २८ पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्त
मेव च एतानि समभागानि दंती च त्रिगुणा भवेत् २९ त्रिवृदष्टगुणा ज्ञेया षड्गुणाऽत्र शर्करा २९ मधुना मोदकान् कृत्वा कर्षमा
प्र त्रैमाणतः ३० एकैकं भक्षयेत् प्रातः शीतं चानु पिबेज्जलं तावद्विरिच्यते जंतुर्यावदुष्णं न सेवते ३१ पानाहारविहारेषु भवेन्नियंत्र

८२ गाः सदा विषमज्वरमंदाग्निपांडुकासभगंदरान् ३३ दुर्नामकुष्ठगुल्मार्शोगलगंडभ्रमोदरान् विदाहप्लीहमेहांश्च यक्ष्माणं नय
नामयान् वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीं पृष्ठपार्श्वोरुजघनजंघोरुरुजं जयेत् ३४ सततं शीलनादेषः पलितानि
प्रणाशयेत् अभयामोदकाः ह्येते रसायनकराः स्मृताः ३५ इति अभयामोदकः पित्वा विरेचनं शीतजलैः सेचयेच्च सुधी सुगं
धि किंचिदाघ्राय तांबूलं शीलयेद्ध्रुवं ३६ निवातस्थो न वेगांश्च धारयेन्न स्वपेत्तथा शीतांबु न स्पृशेत्क्वापि कोष्णं नीरं पिबेन्मु
हुः ३७ बलासौषधपित्तानि वायुर्वा तै यथा व्रजेत् रेके तथा मलं पित्तं भेषजं च कफो व्रजेत् ३८ दुर्विरिक्तस्य नाभेस्तु स्तब्धत्वं कुक्षि
शूलता पुरीषवातसंगश्च कंडूमंडलगौरवाः ३९ विदाहोऽरुचिराध्मानं भ्रमश्छर्दिश्च जायते तं पुनः पाचनैः स्नेहैः पक्वाशं स्निग्धं
रेचयेत् ४० तेनास्योपद्रवा यांति दीप्तोग्निर्लघुता भवेत् विरेकस्यातियोगेन मूर्छा भ्रंशो गुदस्य च ४१ शूलं कफातियोगः स्यान्मां
सधावनसन्निभं मेदसो निभं जलाभासं रक्तं चापि विरिच्यते ४२ तस्य शीतांबुभिः सिक्त्वा शरीरं तंडुलांबुभिः मधुमिश्रैस्तथा शीतैः
कारयेद्वमनं मृदु ४३ सहकारत्वचः कल्को दध्ना सौवीरकेण वा पिष्टो नाभिप्रलेपेन हंत्यतीसारमुल्बणं ४४ आजं क्षीरं रसं
वापि वैष्करं हारिणं तथा शालिभिः षष्टिकैः स्वल्पमसूरैर्वापि भक्षयेत् ४५ शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक् लाघवे ८२
मनसस्तुष्टावनुलोमं गतेऽनिले ४६ सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि इंद्रियाणां बलं बुद्धिप्रसादो वह्निदीप्तता ४७ धा

तुस्थैर्यं वयःस्थैर्यं भवेद्रेचनसेवनात् प्रवातसेवां शीताम्बु स्नेहाभ्यंगमजीर्णता ४८ व्यायामं मैथुनं चैव न सेवेत विरेचिता शा
लिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्कृती ४९ जांगलैर्विष्किराणां वा रसैः शाल्योदनं हितं॥ इति श्रीदामोदरसूनोः शार्ङ्गधरेण विरचि
तायां विरेकविधिरध्यायः॥ अथ वस्तिविधिः वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परं ५० यः स्नेहैर्दीयते स स्यादनुवासनना
मकः कषायक्षीरतैलाद्यैर्निरूहः स निगद्यते ५१ वस्तिर्निर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः तत्रानुवासनाख्यो हि वस्तिर्यः सोत्र
कथ्यते ५२ पूर्वमेव ततो वस्तिर्निरूहाख्यो भविष्यति निरूहादुत्तमश्चैव वस्तिस्यादुत्तराभिधः ५३ अनुवासनभेदश्च मात्रावस्ति रु
दीरितः ५ पलद्वयं तस्य मात्रा तस्मादर्द्धापि वा भवेत् ५४ अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलाऽनिलो नानुवास्यस्तु कुष्ठी स्या
न्मेही स्थूलस्तथोदरी ५४ नास्थाप्या नानुवास्याः स्युरजीर्णोन्मादतृड्युताः शोषमूर्छारुचिश्वासकासक्षयगरातुराः ५५ ने
त्रं कार्यं सुवर्णादिधातुभिर्वृक्षवेणुभिः नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ५६ एककर्षात्तु षट्वर्षं यावन्मानं षडंगु
लं ततो द्वादशकं यावन्मानं स्यादष्टसंमितं ५७ ततः परं द्वादशभिरंगुलैर्नेत्रदैर्घ्यता मुद्गच्छिद्रं कलायाभं छिद्रं कोलास्थि
रध्रकं ५८ यथाक्रमं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभं आतुरांगुष्ठमानेन मूले स्थूलं विधीयते ५९ कनिष्ठिकापरीणाह
मग्ने च गुटिकामुखं तन्मूले कर्णिके द्वे च कार्ये भागाच्चतुर्थकात् ६० योजयेत्तत्र वस्तिं च बंधद्वयविधानतः मृगाजशूकरगवां

८७ म हिषस्यापि वा भवेत् ६१ मूत्रकोशस्य वस्तिस्तु तस्ताभेन्यचर्मजः कषायरक्तः सुमृदुर्वस्तिः स्निग्धो दृढो हितः ६२ व्रणावस्ते
स्तु नेत्रं च स्यात्तस्य शाष्टांगुलोन्मितं मुद्गच्छिद्रं गृध्रपक्षनलिकापरिणाहि च ६३ शरीरोपचयं वर्णं बलमारोग्यमायु
षः कुरुते परिवृद्धिं च वस्तिः सम्यगुपासितः ६४ दिवा शीते वसंते च स्नेहवस्तिः प्रदीयते ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनु
वासनं ६५ नवातिस्निग्धमशनं भोजयित्वानुवासयेत् मदं मूर्छां च जनयेद्द्विधा स्नेहः प्रयोजितः ६६ रूक्षं भुक्तवतो ह्यन्नं
बलं वर्णं च हापयेत् युक्तस्नेहमतो जंतुं भोजयित्वानुवासयेत् ६७ हीनमात्रावुभौ वस्तिनातिकार्यकरौ स्मृतौ अतिमात्रौ
तथानाहक्लमातीसारकारकौ ६८ उत्तमस्य पलैः षड्भिर्मध्यमस्य पलैस्त्रिभिः पलार्द्धार्द्धेन हीनस्तु तासु मात्रानुवासने ६९
शताह्वासैंधवाभ्यां च देयं स्नेहे च चूर्णकं तन्मात्रोत्तममध्यं षट् चतुर्द्वय माषकैः ७० विरेचनात्सप्तरात्रे गते जातबलाय च भु
क्तान्नायानुवास्याय वस्तिर्देयोनुवासनः ७१ अथवानुवास्यं स्वभ्यक्तमुष्णांबु स्वेदितं शनैः भोजयित्वा यथाशास्त्रं कृतं चंक्रम
णं ततः ७२ उत्सृष्टानिलविण्मूत्रं योजयेत्स्नेहवस्तिना सुप्तस्य वामपार्श्वेन वामजंघाप्रसारिणः ७३ कुंचितापरजंघस्य॥
नेत्रं स्निग्धे गुदे न्यसेत् बध्वा वस्तिमुखं सूत्रैर्वामहस्तेन धारयेत् ७४ पीडयेद्दक्षिणेनैव मध्यवेगेन धीरधीः जृंभाकासक्ष
वादींश्च वस्तिकालेन कारयेत् ७५ त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीडने ततः प्रणिहिते स्नेह उत्तानो वाक्शतं भवेत्॥ ८७

७६ प्रसारैरित्तैः सर्वगात्रैः यीथा वीर्यं विसर्प्पति ताडयेत्तलयोरेवं त्रीनत्रीनवारान् शनैः शनैः ७७ स्फिजोश्चैव स्नेहः प्रत्येति यस्य तु उ
पद्रवं विना चैव स सम्यगनुवासितः ७८ जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः लघ्वन्नं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि
८० अनुवासितस्तत्प्रातस्तमितेरन्हि सुखोदकं धान्यशुंठीकषायं वा स्नेहव्यापत्तिनाशनं ८१ अनेन विधिना षड् वा सप्त चाष्टौ न
वापि च विधेया वस्तयस्तेषामंतरा तु निरूहणं ८२ दत्तस्तु प्रथमो वस्तिः स्नेहये द्वस्तिवंक्षणौ सम्यगदत्तो द्वितीयस्तु मूर्द्धस्थमनि
लं जयेत् ८३ वलं वर्णं च जनयेत्तृतीयस्तु प्रयोजितः चतुर्थपंचमौ दत्तौ स्नेहयेतां रसासृजी ८४ षष्ठो मांसं स्नेहयति सप्तमो मद
श्च अष्टमो नवमश्चापि मज्जानि यथाक्रमं ८५ एवं शुक्रगतान् दोषान् द्विगुणाः साधु साधयेत् अष्टादशाष्टादशकान् वस्तीनां
योनियेवत्ते ८६ सवृंजरो वलोऽस्य स्पयवेत्तुल्योऽमरप्रभः रूक्षाय बहुवाताय स्नेहवस्तिं दिने दिने ८७ दद्याद्वैद्यस्तथाऽन्येषामग्
न्याबाधभयात्त्र्यहात् स्नेहोऽल्पमात्रो रूक्षाणां दीर्घकालमनत्ययः ८८ तथा निरूहः स्निग्धानामल्पमात्रः प्रशस्यते अथवा
यस्य तत्कालं स्नेहो निर्यातिकेवलः ८९ तस्याऽन्योऽल्पतरो देयो न हि स्निग्धस्य तिष्ठति अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः
९० तदांगशोथिल्पमाध्मानं शूलः श्वासश्च जायते पक्वाशयगुरुत्वं च तत्र दद्यान्निरूहणं ९१ तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलव
र्त्तिं हिताऽथवा यथानुलोमनं वापमलं स्नेहश्च जायते ९२ तथा विरेचनं दद्यात्तीक्ष्णं नस्यं च शस्यते यस्य नोपद्रवं कुर्यात्स्ने

९० हवस्तिर नि[illegible]स्तः ९३ सर्वोऽसौवाच नौ रोक्ष्या दुपेक्ष्यः सविज्ञानता अनायाते त्वहोरात्रे स्नेहं संशोधनैर्हरेत् ९४ स्नेहव
स्तावनां [illegible]तेनान्यः स्नेहो विधीयते गुडूच्येरंडपूतीकभार्गीवृषकरोहिषं ९५ शतावरीशहचरं काकनासापलोन्मितान्
यवमाषा[illegible]तसीकोलकुलत्थान प्रसृतोन्मितान् ९६ चतुर्द्रोणांभसः पक्त्वा द्रोणशेषेण तेन च पचेत्तैलाढकं पेष्यैर्जीवनी
यैः पलोन्मितैः ९७ अनुवासनमेतद्धि सर्ववातविकारनुत् षट्सप्ततिर्यो मरस्तु न्यायं तेवस्ति कर्मणा ९८ दूषिताः समुदाये
न ताश्चिकित्स्यास्तु सुश्रुतात् पानाहार विहाराश्च परिहाराश्च कृत्स्नशः ९९ स्नेहपानसमाकार्या नात्र कार्या विचारणा ॥
इति श्रीदामोदरसूनोः शार्ङ्गधरेण विरचितायां स्नेहवस्तिविधिरध्यायः ॥ अथ निरूहवस्तिविधिः निरूहवस्तिर्बहुधा भिद्य
ते कारणांऽतरैः १०० तैरेवतस्य नामानि कृतानि मुनिपुंगवैः निरूहस्याऽपरं नाम प्रोक्तमास्थापनं बुधैः १ स्वस्थाने स्थाप
नाद्दोषधातूनां स्थापनं मतं निरूहस्य प्रमाणं च प्रस्थं पादोत्तरं परं २ मध्यमं प्रस्थमुद्दिष्टं हीनं च कुडवास्त्रयः अतिस्निग्धः
लिप्तदेहः क्षतोरस्कः कृशस्तथा ३ आध्मानछर्दिहिक्कार्शः श्वासकासप्रपीडितः गुदशोफातिसारार्तो विशूचीकुष्ठसंयुतः ४
गर्भिणी मधुमेही च नास्थाप्यश्च जलोदरी वातमाधार्वुदावर्तवातास्र विषमज्वरे ५ मूर्छातृष्णोदरानाहमूत्रकृच्छ्राऽश्मरीषु च
वृद्ध्यसृग्दरमंदाग्निप्रमेहेषु निरूहणं ६ शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद्बुधः ७ उत्सृष्टाऽनिलविण्मूत्रं स्निग्धस्विन्नमभो ९०

जितं ७ मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत् । अनेहवस्तिविधानेनबुधः कुर्यान्निरूहणं ८ जाते विधानेतु ततो
भवेदुत्कटकासनः तिष्ठेन्मुहूर्तमात्रं निरूहागमनेछया ९ अनायातं मुहूर्तात्तु निरूहं शोधनैर्हरेत् निरूहैरेवमतिमा
नक्षारमूत्राऽम्लसैंधवैः १० यस्य क्रमेणागच्छेत्तु विट्पित्तकफवायवः लाघवं चोपजायेत सुनिरूढं तमादिशेत् ११ यस्यस्या
द्वस्तिरल्पाल्पवेगो हीनमलानिलः मूत्रार्त्तिजाड्यारुचिमान् दुर्निरूढं तमादिशेत् १२ विविक्तता मनस्तुष्टिः स्निग्धताव्याधि
निग्रहः आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणं १३ अनेन विधिनायुंज्यान्निरूहं वस्तिदानवित् द्वितीयं वा तृतीयं वा च
तुर्यं वा यथोचितं १४ सस्नेहराकः पवने पित्ते दोषपयःसह कषायकटुमूत्राढ्याः कफे चोष्णास्त्रयोजिताः १५ पित्तश्लेष्मानिला
विष्टंक्षीरयूषरसैः क्रमात् निरूहं भोजयित्वा च ततस्तदनुवासयेत् १६ सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः वस्तिस्तीक्ष्णा
प्रयुक्तस्तु तेषां हन्याद्बलायुषी १७ दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं परं ततः पश्चात्संशमनार्थं च दद्याद्वस्तिं विचक्षणाः १८
एरंडबीजं मधुकं पिप्पलीसैंधवं वचा हपुषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः १९॥ इति उत्क्लेशनवस्तिः शताह्वामधुकं
विल्वं कौटजं फलमेव च सकांजिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः २० दोषहरवस्तिः प्रियंगुर्मधुकं मुस्तं तथैव च रसांजनं सक्षीरः
शस्तं ते वस्तिर्दोषाणां शमने स्मृता २१ इति दोषशमनवस्ति शोधनद्रव्यनिष्क्वाथास्तत्कल्कैः स्नेहसैंधवैः युक्ताः खनेन मथिताव

९१ स्तयः शोधनाः स्मृताः २२ इति शोधनवस्तयः॥ त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः ऊषकादिप्रतीवापैर्वस्तयो लेखनाः
स्मृताः २३ लेखनवस्तयः बृंहणद्रव्यनिःक्वाथकल्कैः रसैर्युताः सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः २४ बृंहणवस्तयः बद
रैरावती शेलुशाल्मली धन्वनागराः क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः २५ अजोरभ्रैणशशरुधिरैर्युक्ता देया विचक्ष
णैः मात्रा पिच्छिलवस्तीनां पले द्वादशभिर्मिता २६ पिच्छिलवस्तयः दत्वादौ सैंधवं स्वाक्षं मधुनः प्रसृतिद्वयं विनिर्मथ्य ततो दद्या॥
द्यात्स्नेहस्य प्रसृतित्रयं २७ एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत् संमूर्छिते कषायेतु चतुःप्रसृतिसंमिताः २८ क्षिप्त्वावि
मथ्य दद्याच्च निरूहं कुशलो भिषक् वाते चतुःपलं क्षौद्रं दद्यात्स्नेहस्य षट्पलं २९ पित्ते चतुःपलं क्षौद्रं स्नेहं दद्यात्पलत्रयं कफे
च षट्पलं क्षौद्रं क्षिपेत्स्नेहं चतुःपलं ३० इति निरूहमात्रावस्तिः एरंडक्वाथतुल्यांशं मधुतैलं पलाष्टकं शताह्वार्द्धेन सैंध
वार्द्धेन संयुतः ३१ मधुतैलकसंज्ञेयं वस्तिः खञ्जविलोदितः मेहगुल्मकृमिप्लीहमलोदावर्तनाशनः ३२ बलवर्णकरश्चैव वृष्यो
दीपनबृंहणः मधुतैलवस्तिः क्षौद्राज्यक्षीरतैलानां प्रसृतं प्रभवेत् ३३ हपुषासैंधवसारो वस्तिः स्याज्जीवनः परः जीवनवस्तिः॥
एरंडमूलनिःक्वाथो मधुतैलं ससैंधवं ३४ एषयुक्तिरथो वस्तिः सवचापिप्पलीफला युक्तरथवस्तिः पंचमूलस्य निःक्वाथस्तैलं मा
गधिका मधु ३५ ससैंधवः समधुकः सिद्धवस्तिरिति स्मृतः स्नानमुष्णोदकैः कुर्याद्दिवास्वप्नमजीर्णतां ३६ वर्जयेत्परं सर्वमाच ९१

रे स्नेहवस्तिवत्॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां निरूहवस्तिविधिरध्यायः॥ अथ उत्तरवस्तिविधिः अथातः प
संप्रवक्ष्यामि वस्तिमुत्तरसंज्ञितं द्वादशांगुलकं नेत्रं मध्ये च कृतकर्णिकं मालतीपुष्पवृंताभं छिद्रं सर्षपनिर्गमं ३९ पंचविं
शतिवर्षाणामधोमात्रा द्विकार्षिकी तदूर्द्ध्वं पलमात्रं च स्नेहस्योक्ता भिषग्वरैः ४० अथास्थापनशुद्धस्य तृप्तस्य स्नानभोजनैः
स्थितस्य जानुमात्रे च पीठे ऽन्विष्य शलाकया ४१ स्निग्धया नेत्रमार्गं च ततो नेत्रं नियोजयेत् शनैः शनैर्धृतास्यक्तं मेढ्रंरध्रे ऽङ्गु
लानि षट् ४२ ततो ऽवपीडयेद्वस्तिं शनैर्नेत्रं च निर्हरेत् ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः ४३ स्त्रीणां कनिष्ठिकास्थूलं
नेत्रं कुर्याद्दशांगुलं मुद्गप्रवेशयोग्यं च योन्यंतश्चतुरंगुलं ४४ द्व्यंगुलं मूत्रमार्गेण सूक्ष्मनेत्रं नियोजयेत् मूत्रकृच्छ्रविकारे
च बालानां त्वेकमंगुलं ४५ शनैर्निष्कंपमाधेयं सूक्ष्मनेत्रं विचक्षणैः योनिमार्गे च नारीणां स्नेहमात्रा द्विपालिकी ४६
मूत्रमार्गे पलोन्माना बालानां च द्विकार्षिकी उत्तानायै स्त्रियै दद्यादूर्द्ध्वजान्वै विचक्षणः ४७ अप्रत्यागच्छति भिषक् वस्ता
वुत्तरसंज्ञिते भूयो वस्तिं निदध्यात्तु संयुक्तं शोधनैर्गणैः ४८ फलवर्तिं निदध्याद्वा योनिमार्गे दृढं भिषक् सूत्रैर्विनिर्मि
तां स्निग्धां शोधनद्रव्यसंयुतां ४९ दह्यमाने तथा वस्तौ दद्याद्वस्तिं विशारदः क्षीरवृक्षकषायेण पयसा शीतलेन वा ५०
वस्तिः शुक्ररजः पुंसां स्त्रीणामार्तवजां रुजः हन्यादुत्तरवस्तिस्तु नो हितो मोहिनी क्वचित् ५१ सम्यग्दत्तस्य लिंगानि व्यापदः

लं म एव च वस्तेरुत्तरसंज्ञस्य समानं स्नेहवस्तिना ५२ घृताभ्यक्ते गुदे क्षेप्या अंगुष्ठसन्निभा मलप्रवर्तिनी ॥ वर्तिः फलवर्तिश्च सा स्मृता ५३ इति फलवर्तिः ॥ इति श्रीदामोदरसूनुना शार्ङ्ग० उत्तरवस्तिविधिरध्यायः अथ नस्यविधिः ५४ नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधं नावनं नस्यकर्मेति तस्य नामद्वयं मतं ५५ तस्य भेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतं ५६ कफपित्तानिलध्वंसे पूर्वमध्यापराह्णके दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे ॥ ५७ नस्यं त्यजेद्भोजनांते दुर्दिने चापि तर्पितः तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ५८ अजीर्णी दत्तवस्तिश्च पीतस्नेहो द्रवासवः क्रुद्धः शोकाभिभूतश्च तृष्णार्तो वृद्धबालकौ ५९ वेगावरोधी श्रान्तश्च स्नातुकामश्च वर्जयेत् अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत् ६० अशीतिवर्षादूर्ध्वं च नावनं नैव दीयते अथ वैरेचनं नस्यं कुर्यात्तैलैः सुतीक्ष्णकैः ६१ तीक्ष्णैर्भेषजसिद्धैर्वा स्नेहैः क्वाथैः रसैस्तथा नासिकारंध्रयोरष्टौ षट् च चत्वार एव बिंदवः ६२ प्रसेके रेचनं योज्या मुख्यमध्यान्तमात्रया नस्यकर्मणि शाणांशं शारीरकं तीक्ष्णमौषधं ६३ हिंगु स्याद्यवमात्रं तु माषैकं सैंधवं मतं क्षीरं चैवाष्टशाणं स्यात् पानीयं च त्रिकार्षिकं ६४ ॥ कार्षिकं मधुरं द्रव्यं नस्यकर्मणि योजयेत् अवपीडः प्रधमनं द्वौ भेदावपरौ स्मृतौ ६५ शिरोविरेचनस्यार्थे तौ तु द्वौ योग्यतां गतौ ॥ कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः ६६ सोवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः षडंगुला द्विमुखा च या नाडी च

रीतप्राधमेत ६७ तीक्ष्णंकोलमितंवक्त्रवातैःप्रधमनंहितं ऊर्ध्वजंतुगतेरोगेकफजेस्वरसंक्षये ६८ अरोचकेप्रतिश्यायेशिरः
शूलेचपीनसे शोफाऽपस्माररोगेषुनस्यंवैरेचनंहितं ६९ भीरुस्त्रीकृशबालानांनस्यंस्नेहेनसस्यते गलरोगेसन्निपातेनिद्रायां
विषमेज्वरे ७० मनोविकारेक्रिमिषुयुज्यतेचावपीडनं अत्यंतोत्कटदोषेषुसंज्ञेषुचदीयते ७१ चूर्णंप्रधमनंधीरैस्तद्धितीक्ष्णतरंत
यतः नस्यंवैरेचनंतथा नस्यंस्यात्कुहशुंठीभ्यांपिप्पल्यासैंधवेनवा ७२ जलपिष्टैर्नतैनाक्षिकर्णनासाशिरोगदाः मन्याहनुगलोद्भू
तानश्यंतिभुजपृष्ठजाः ७३ मधूकसारकृष्णाभ्यांवचामरिचसैंधवैः नस्यंकोष्णजलैःपिष्टैर्दद्यात्संज्ञाप्रबोधनं ७४ अपस्मारेतथोन्
मादेसन्निपातेऽपतंत्रके सैंधवंश्वेतमरिचंसर्षपाःकुष्ठमेवच ७५ बस्तमूत्रेणसंपिष्टान्नस्यंतंद्रानिवारणं रोहितमत्स्यपित्तेन
भावितंमरिचंवचा ७६ कटफलंचेतितच्चूर्णंज्ञेयंप्रधमनंबुधैः ॥ अथपंचविधस्यनस्यस्यकल्पनाकथ्यतेऽधुना ७७ मर्शश्चप्रतिमर्शश्च
द्विधानेमतौ मर्शस्यतर्पणीमात्रामुख्याशाणैःस्मृताष्टभिः ७८ मध्यमाचचतुःशाणैर्हीनाशाणमितास्मृता शाणैकस्मिंस्तुमात्रेयंदद
यान्नासापुटेबुधैः ७९ मर्शस्यापिद्विविधेलंवाचीस्यदोषवलावलं एकांतरंद्व्यंतरंवानस्यंदद्यात्प्रिचक्षणाः ८० अहंपंचाहमथ
वासप्ताहंवासुयंत्रितः मर्शःशिरोविरेकेणव्यापदोविविधाःस्मृताः ८१ दोषोत्क्लेशात्क्षयाच्चैवविज्ञेयास्तायथाक्रमं दोषोत्क्ले
शनिमित्तासुयुंज्याद्वमनशोधनं ८२ अथक्षयनिमित्तासुयथास्वंवृंहणंहितं शिरोनासाक्षिरोगेषुसूर्यावर्तार्द्धभेदके ८३ दंतरो
गेवलेहीनेमग्नावाहंसजेगदे मुखशोषेकर्णनादेवातपित्तगदेतथा ८४ अकालपलितेचैवकेशश्मश्रुप्रमातने युज्यतेवृंह

इतीप्रांदवा नोष्प ४ कि टक ३ र हरी ४ नारा ४ मरहासंघ ८ प्रफीम २ मीरवदानपप्रसगतवा जमे

